४५१

दशरूपकावलोकः

A- धनञ्जयः धनिक

F. २१

अलंकार शास्त्र

[illegible]

२१.१२.८८

नं. ५५१८
दश[illegible] कावलोकः
२१ पत्र[illegible]
[illegible]
[illegible]

काव्य दसरुपनाटक

१०००

४००

श्रीगणेशाय नमः। कुंडल्यकलमेन

॥ पुस्तकमिदं म्पाठकोपाहूरामचन्द्रशर्मणः॥

दशरू.टी. श्रीगणेशायनमः ॥ श्रीभरतायनमः ॥ प्रणिपत्यशिवंसांबमाचार्यंभरतंतथा । क्रियतेदशरूपस्यव्याख्यानंधानिकेनवै १ इहसदा
१ चारंप्रमाणयद्भिरविघ्नेनसमासमर्थमिष्टयोःप्रकृताभिमतयोर्देवतयोर्नमस्कारःक्रियतेश्लोकद्वयेन । नमइति । दशरूपेतिच । यस्यकं
ठःपुष्करायतेमदंगवदाचरतिमदाभोगेनघनध्वानोनिविडध्वनिर्नीलकंठस्यशिवस्यतांडवेउद्धतेनृत्येतस्मैगणेशायनमः अत्रचखंड

श्रीगणेशायनमः नमस्तस्मैगणेशाययत्कंठःपुष्करायते । मदाभोगघनध्वानोनीलकंठस्य
तांडवे १ दशरूपानुकारेणयस्यमाद्यंतिभावुकाः नमःसर्वविदेतस्मैविष्णवेभरतायच २

श्लेषाक्षिप्यमाणोपमाच्छायालंकारः । नीलकंठस्यमयूरस्यतांडवेमंद्रमेघध्वनिर्यथापुष्करायते इतिप्रतीतेः १ दशरूपेसेकत्रमत्स्य शिव
कूर्मादिप्रतिमारूपेणमत्स्यानुकृतिरूपनाटकादिनायस्यभावुकाध्यातारोरसिकाभ्रमाद्यंतिहृष्यंतितस्मैविष्णवेअभिमतायप्र १
कृतायभरतायचनमः २

अथश्लोकप्रवृत्तिनिमित्तं दर्शयति। कस्यचिदिति। अंकं चिद्विषयं प्रकरणादिरूपं नाटकादिकं कदाचिदेव दयया कस्यचिदेव कवेः स
रस्वती योजयति। येन प्रकरणादिना विषयेनान्योपि जनो विदग्धो भवति ३ स्वप्रवृत्ते विषयं दर्शयति उद्धृत्येति। पन्नाद्यवेदं देव्याः

कस्यचिदेव कदाचिद्दयया विषयं सरस्वती विदुषः। घटयति कमपि तमन्यो व्रजति जनो येन वैदग्धीम् ३ उद्धृ
त्योद्धृत्य सारं यमखिलनिगमान्नाट्यवेदं विरिंचिश्चक्रे यस्य प्रयोगं मुनिरपि भरतस्तांडवं नीलकंठः। शर्वा
णी लास्यमस्य प्रतिपदमपरो लक्ष्म कः कर्तुमीष्टे नाट्यानां किंतु कंचित्प्रगुणरचनया लक्षणं संक्षिपामि ४

सारमादाय ब्रह्मा हृतवान् यत्संबंधिनमभिनयं भरतश्चकार करणांगहारान् करोत् हरस्तांडवमुद्धतं लास्यं सुकुमारं तु
पार्वती अस्य सामस्त्येन लक्षणं कर्तुं कः शक्तः तदेकदेशस्य दशरूपकस्य लक्षणं संक्षेपः क्रियत इत्यर्थः ४

विषयैक्यप्रसक्तं पौनरुक्त्यं परिहरति। व्याकीर्णे इति व्याकीर्णे विक्षिप्ते विस्तीर्णे च शास्त्रे अल्पबुद्धीनां पुंसां मतिमोहो भवति तेनास्य नाट्यवेदस्यार्थस्तत्पदैरेव संक्षिप्य ऋजुवृत्त्या क्रियत इति इदं प्रकरणं दशरूपकज्ञानफलं ह्पा दशरूपकं किंफलमित्याह आनंदेति अन्ये केचिद्धर्मार्थकाममोक्षेषु वैलक्षण्यं कलासु च करोति कीर्तिं प्रीतिं च साधुकाव्यनिषेवणम् इत्यादिना त्रिवर्गादि

व्याकीर्णे मंदबुद्धीनां जायते मतिविभ्रमः तस्यार्थस्तत्पदैरेव संक्षिप्य क्रियतेऽञ्जसा ५ आनंदनिस्यं
दिषु रूपकेषु व्युत्पत्तिमात्रं फलमल्पबुद्धिः योऽपीतिहासादिवदाह साधुस्तस्मै नमः स्वादुपराङ्मुखाय ६

व्युत्पत्तिं काव्यफलत्वेनेच्छंति तन्निरासेन स्वसंवेद्यः परमानंदरूपो रसास्वादो दशरूपाणां फलं न पुनरितिहासादिवत्त्रिवर्गादि
व्युत्पत्तिमात्रमिति दर्शितम् नम इति सोल्लुंठम॥६॥

नाट्यानां लक्षणं संक्षिपामीत्युक्तं किं पुनस्तन्नाट्यमित्याह अवस्थेति॰ काव्योपनिबद्धधीरोदात्ताद्यवस्थानुकारश्चतुर्विधाभिनयेन तादात्म्यापत्ति
र्नाट्यम् रूपमिति तदेव नाट्यं दृश्यमानतया रूपमित्युच्यते नीलरूपादिरूपवत् नटे रामाद्यवस्थारोपेण रूपकं मुखचन्द्रादिवत् इत्येकस्मिन्नर्थे
प्रवर्तमानस्य शब्दत्रयस्येन्द्रः शक्रः पुरंदर इतिवत्प्रवृत्तिनिमित्तभेदो दर्शितः। दशधैवेति रसानाश्रित्य वर्तमानं दशप्रकारमेवेत्यवधारणं शुद्धाभि
प्रायेण नाटिकादीनां संकीर्णत्वेन वक्ष्यमाणत्वात् ७ तानेव दशभेदानुद्दिशति नाटकमिति ८ ननु डोम्बीश्रीगदितभाणभाणीप्रस्थानरासकाः

अवस्थानुकृतिर्नाट्यं रूपं दृश्यतयोच्यते रूपकं तत्समारोपाद्दशधैव रसाश्रयम् ७ नाटकं सप्रकरणं भाणः प्रहसनं डि
मः व्यायोगसमवाकारौ वीथ्यङ्केहामृगा इति ८ अन्यद्भावाश्रयं नृत्यं नृत्तं ताललयाश्रितम्॥

काव्यं च समस्तनृत्यस्य भेदाः स्युस्तेपि भाणवदिति रूपकान्तराणामपि संभावादेवधारणानुपपत्तिरित्याशंक्याह अन्यदिति रसाश्रयान्नाट्याद्भावा
श्रयं नृत्यमन्यदेव तत्र भावाश्रयमिति विषयभेदात् नृत्यमिति नृतेर्गात्रविक्षेपार्थत्वेनाङ्गिकबाहुल्यात्तत्कारिषु च नर्तकव्यपदेशाल्लोकेपि रं
गप्रेक्षणीयकमिति व्यवहारान्नाटकादेरन्यन्नृत्तं तद्भेदत्वाच्छ्रीगदितादेरवधारणोपपत्तिः। नाटकादि च रसविषयं रसस्य च पदार्थीभ
तविभावादिसंसर्ग॥

द०रू०टी०
३

त्मकवाक्यार्थरूपत्वाद्वाक्यार्थाभिनयात्मकत्वं रसाभ्युपायमनियमेन दर्शितं नाट्यमिति नटनं नट अवस्पंदने इति नटेः किंचिच्चलनार्थत्वात्सात्विकबाहुल्य
मत एव तत्कारिषु नट इति व्यपदेशः यथा च गात्रविक्षेपार्थत्वे समानेप्यनुकारात्मकत्वेन नृत्तादन्यन्नृत्यं तथा वाक्यार्थाभिनयात्मकान्नाट्यात्प
दार्थाभिनयात्मकमन्यदेव नृत्यमिति प्रसंगान्नृत्तं व्युत्पादयति नृत्तमिति तालश्चंचत्पुटादिः लयो द्रुतादिस्तन्मात्रापेक्षोंऽगविक्षेपोऽभिनयशू
न्यो नृत्तमिति। अनन्तरोक्तं द्वयं व्याचष्टे आद्यमिति नृत्यं पदार्थाभिनयात्मकं मार्ग इति प्रसिद्धं नृत्तं देशीति ॥ द्विविधस्यापि द्वैविध्यं दर्शय

आद्यं पदार्थाभिनयो मार्गो देशी तथा परं ॥ मधुरोद्धतभेदेन तद्द्वयं द्विविधं पुनः लास्यतांडवरूपेण द्वयं नाट्योपकारकम् १०
वस्तु नेता रसस्तेषां भेदको वस्तु च द्विधा तत्राधिकारिकं मुख्यमंगं प्रासंगिकं विदुः ११

ति मधुरेति सुकुमारं द्वयमपि लास्यमुद्धतं द्वितयमपि तांडवमिति प्रसंगे प्रसंगस्योपयोगं दर्शयति द्वयमिति द्वयं तच्च नाटकाद्युपकारकमि
ति नृत्यस्य क्वचिदवान्तरपदार्थाभिनयेन नृत्तस्य च शोभाहेतुत्वेन नाटकादावुपयोग इति १० अनुकारात्मकत्वेन रूपकाणामभेदात्किं
कृतो भेद इत्याशंक्याह वस्त्विति नेतृभेदात् नायकभेदात् रसभेदाद्रूपाणामन्योन्यभेद इति वस्तुभेदमेवाह द्विधेति कथमित्याशंक्या ३
ह तत्रेति प्रधानभूतमाधिकारिकं यथा रामायणे रामसीतादिवृत्तान्तः तदंगभूतं प्रासंगिकं यथा तत्रैव सुग्रीवविभीषणादिवृत्तान्त इति ११

=यथा वा मुद्राराक्षसे द्वितीयेऽङ्के विराधगुप्तराक्षसयोर्महतीसंवादकथा पताका। चतुर्थेऽङ्के राक्षससंवादरूपान्या कथा प्रकरी चोक्ता। ४ =

निरुक्त्याधिकारिकं दर्शयति अधिकार इति फले स्वस्वामिसंबंधोऽधिकारः फलस्वामी चाधिकारी तेनाधिकारिणा निर्वृत्तं फलपर्यन्ततां नीयमानमितिवृत्तमाधिकारिकं १२ प्रासंगिकं निर्वक्ति प्रासंगिकमिति यस्य इतिवृत्तस्य परप्रयोजनस्य सतस्तत्प्रसंगात्स्वप्रयोजनसिद्धिस्तत्प्रासंगिकमिति वृत्तं प्रसंगनिर्वृत्तेः प्रासंगिकमपि पताकाप्रकरीभेदाद्द्विविधमित्याह सानुबंधमिति दूरं यदनुवर्तते प्रासंगिकं सा पताका सुग्रीवादिवृत्तवत् पताकेवासाधारणनायकचिह्नवत्तदुपकारित्वात् यदल्पं सा प्रकरी श्रमणादिवृत्तांतवत् १३ पताकाप्रसंगेन पताकास्थान

अधिकारः फले स्वाम्यमधिकारी च तत्प्रभुः तन्निर्वर्त्यमभिव्यापि वृत्तं स्यादाधिकारिकं १२ प्रासंगिकं परार्थस्य स्वार्थो यस्य प्रसंगतः सानुबंधं पताकाख्यं प्रकरी च प्रदेशभाक् १३ प्रस्तुतागन्तुभावस्य वस्तुनोऽन्योक्तिसूचकं पताकास्थानकं तुल्यसंविधानविशेषणम् १४ प्रख्यातोत्पाद्यमिश्रत्वभेदात्त्रेधापि तत्त्रिधा प्रख्यातमितिहासादेरुत्पाद्यं कविकल्पितम् १५

कं व्युत्पादयति प्रस्तुतेति प्राकरणिकस्याभाविनोऽर्थस्य सूचकं रूपकं पताकावद्भवतीति पताकास्थानकं तत् तुल्येतिवृत्ततया तुल्यविशेषणतया चाद्विप्रकारमन्योक्तिसमासोक्तिभेदात् यथा यातोऽस्मि पद्मनयने समयो ममैष सुप्ता मयैव भवती प्रतिबोधनीया प्रत्यायनामयमितीव सरोरुहिण्याः सूर्योऽस्तमस्तकनिविष्टकरः करोति यथा च तुल्यविशेषणतया उद्दामोत्कलिकां विपाण्डुररुचं प्रारब्धजृंभां क्षणादायासं श्वसनोद्गमैरविरलैरातन्वतीमात्मनः अद्योद्यानलतामिमां समदनां नारीमिवान्यां ध्रुवं पश्यन्कोपविपाटलद्युतिमुखं देव्याः करिष्याम्यहम् १६ आधिकारिकद्विविधप्रासंगिकभेदात्त्रिविधस्यापि त्रैविध्यमाह प्रख्यातेति १५

द.रू.टी.
४

5

मिश्रं चेति तस्येति वृत्तस्य किं फलमित्याह कार्यमिति धर्मार्थकामाः फलं तच्च शुद्धमेकैकमेकानुबंधं द्व्यनुबंधं वा १६ तत्साधनं व्युत्पादय
ति स्वल्पेति स्तोकोद्दिष्टः कार्यसाधकः पुरस्तादनेकप्रकारं विस्तारी हेतुविशेषो बीजवद्बीजं यथा रत्नावल्यां वत्सराजस्य रत्नावलीप्राप्तिहेतुर
नुकूलदैवो यौगंधरायणव्यापारो विष्कंभके न्यस्तः। एवमत्र कः संदेहः द्वीपादन्यस्मादपीतिपठितीत्यादिना प्रारंभेऽस्मिन्स्वामिनो वृद्धिहे
तावित्यन्तेन यथा च वेणीसंहारे द्रौपदीकेशसंयमनहेतुर्भीमक्रोधोपचितो युधिष्ठिरोत्साहो बीजं यथा च मुद्राराक्षसे चंद्रगुप्तलक्ष्मीस्थैर्यफल
कस्य राक्षससंग्रहरूपकार्यस्य हेतुरनुकूलदैवश्चाणक्यनीतिप्रयोगो बीजमिति तच्च महाकार्यावांतरकार्यहेतुभेदादनेकप्रकारमिति अ

मिश्रं च संकरात्तेन दिव्यमर्त्यादिभेदतः कार्यं त्रिवर्गस्तच्छुद्धमेकानेकानुबंधि वा १६ स्वल्पोद्दिष्टस्तु तद्धेतुर्बीजं विस्तार्यनेकधा
अवांतरार्थविच्छेदे बिंदुरच्छेदकारणम् १७ बीजबिंदुपताकाख्यप्रकरीकार्यलक्षणाः अर्थप्रकृतयः पंच ता एताः परिकीर्तिताः १८

वांतरबीजस्य संज्ञांतरमाह अवांतरार्थेति यथा रत्नावल्यां अवांतरप्रयोजनानंगपूजापरिसमाप्तौ कार्यार्थविच्छेदे सत्यनंतरकार्यहेतु शिव
रुदयनस्येंदोरिवोद्वीक्षते सागरिका श्रुत्वा कहं एसो उदयणराअ इदो जस्स अहं तादेण दिण्णा इत्यादि यथा मुद्राराक्षसे राक्षसः पत्रं ४
गृहीत्वा स्वगतं किमत्र लिखितं स्वामीत्यादि यथा प्रधानत्वान्नविच्छिन्नस्यांतरितस्य बीजस्य पुनः प्रवर्तनात् बिंदुर्जले तैलबिंदुवत्प्रसृतत्वात् १७
रदानीं पताकाद्यप्रसंगाच्चतुर्णामोकनामार्थमुपसंहरन्नाह बीजेत्यादि अर्थप्रकृतयः प्रयोजनसिद्धिहेतवः १८ चाणक्यः २

चाणक्यः ३

अन्यदवस्थापंचकमाह अव[illegible]स्था इति १९ यथोद्देशं लक्षणमाह औत्सुक्यमिति इदमहं संपादयामीत्यध्यवसायमात्रमारंभ इत्युच्यते
यथा रत्नावल्यां प्रारंभेऽस्मिन्स्वामिनो वृद्धिहेतौ दैवे चेत्थं दत्तहस्तावलंबे इत्यादिना सचिवायत्तसिद्धेर्वत्सराजस्य कार्यारंभो यौगंधरायणमुखे
न दर्शितः यथा च मुद्राराक्षसे प्रथमेंके राक्षसः ऐश्वर्यादनपेतमीश्वरमयं लोकोऽर्थतः सेवते तं गच्छंत्यनु ये विपत्तिषु पुनस्ते तत्प्रतिष्ठाशया भर्तु नर
र्ये प्रलयेपि पूर्व[illegible]सुकृतासंगेन निःसंगया भक्त्या कार्यधुरं वहंति बहवस्ते दुर्लभास्त्वादृशाः अत एवास्माकं त्वत्संग्रहे यत्न इति अथ प्रयत्नः प्रय

अवस्थाः पंच कार्यस्य प्रारब्धस्य फलार्थिभिः आरंभयत्नप्राप्त्याशानियताप्तिफलागमाः १९ औत्सुक्य
मात्रमारंभः फललाभाय भूयसे प्रयत्नस्तु तदप्राप्तौ व्यापारोतित्वरान्वितः २०

त्नस्त्विति तस्य फलस्याप्राप्तौ उपाययोजनादिरूपः चेष्टाविशेषः प्रयत्नः यथा रत्नावल्यां आलेख्याभिलेखनादिर्वत्सराजस्य समागमोपा
यः सागरिका तह वि ण त्थि अण्णो दंसणोवाओ त्ति जहा जहा आलिहिय जहा समीहिदं करिस्समि इत्यादिना प्रतिपादितः यथा वा मुद्रा
राक्षसे स्वच्छंदमेकचरमुज्ज्वलदानशक्तिमिति प्रथमांकांतप्रयोगे राक्षससंग्रहरूप उपायश्चाणक्येनोक्तः २०

द·रू·टी· प्राप्त्याशामाह उपायेति उपायस्यापायशंकायाश्चाभावादनिर्द्धारितैकांतफलप्राप्तिः प्राप्त्याशा· यथा रत्ना· तृतीयेंके वेषपरिवर्ताभिसरणा
५ दौ स[illegible]मागमोपायो वासवदत्तालक्षणापायशंका विदू· एवं जइ अआलवादावली विअ· आगछिअ· अण्णदो· ता स्सस्स दिवासवदत्ता इत्यादि अत्र
नादर्शितत्वात् अनिर्धारितैकांतसमागमप्राप्तिरुक्ता यथा वा मुद्राराक्षसे द्वितीयेंके आहितुंडिकवेषधारिणो विराधगुप्तस्योक्तिः त्वगनंसं स्कृ सम
5 भ्रिसेत्यादिना कौटिल्यधीरज्जुनिबद्धमूर्तिमित्यनेनोपायशंका राक्षसेन निकृष्यमाणामित्यनेन चैकस्मिन्नेव पद्ये उपायशंका च तात्प्रा

उपायापायशंकाभ्यां प्राप्त्याशा प्राप्तिसंभवः अपायाभावतः प्राप्तिर्नियताप्तिः सुनि
श्चिता २१ समग्रफलसंपत्तिः फलयोगस्तथोदितः॥

से मौर्यलक्ष्मीस्थैर्यरूपायां संभवः। नियताप्तिमाह अपायाभावतः प्राप्तिर्नियताप्तिः सुनिश्चितेति अपायाभाव अवधारितैकांतफलप्रा
प्तिरिति यथा रत्नावल्यां विदूषकः साअरिआ उआदुक्करं जीविस्सदी सुपक्कमस्स किं ण उवाअं चिंतेसी त्वनंतरं राजा वयस्य देवीप्रसादनं मु
क्त्वा नान्यमत्रोपायं पश्यामीत्यनंतरं कार्थं विंदुनानेन देवीलक्षणापायस्य प्रसादनेन निवारणात् नियताफलप्राप्तिः सूचिता २१ ५
फलयोगमाह समग्रेति यथा रत्नावल्यां रत्नावलीप्राप्तिः चक्रवर्तित्वावाप्तिश्च यथा मुद्राराक्षसे राक्षससंग्रहेण मौर्यलक्ष्मीस्थैर्यम्॥

अथसंधिलक्षणमाह· अर्थप्रकृतय इति· अर्थप्रकृतीनां यथासंख्येनावस्थाभिः पंचभिर्योगाद्यथाक्रमेण वक्ष्यमाणमुखाद्याः पंच संधयो जायंते· २२ संधिसाम
न्यलक्षणमाह· अंतरैकार्थेति· एकेन प्रयोजनेनान्वितानां कथांशानामवांतरैः प्रयोजनसंबंधः संधिः। के पुनस्ते संधयस्तत्राह· मुखमिति· २३ यथोद्देशं ल
क्षणमाह· मुखंबीजेति· बीजानां समुत्पत्तिरनेकप्रकारप्रयोजनस्य रसस्य च हेतुर्मुखसंधिरिति व्याख्येयं· तेनात्रिवर्गफले प्रहसनादौ रसोत्पत्तिहेतोरेव
बीजत्वमिति· यथा मुद्राराक्षसे प्रथमेंके चंद्रगुप्तं नमारभ्य निष्क्रांत इति पर्यंतं नानार्थरससंभवा बीजसमुत्पत्तिर्निरूपिता· २४ अस्य च बीजार्थमुक्तानि द्वाद
शांगानि भवंति· तान्याह· उपक्षेप इति सार्द्धेन· २५ एतेषां स्वसंज्ञाव्याख्यातानामपि सुखार्थं लक्षणान्याह· बीजन्यास इति· यथा रत्नावल्यां· नेपथ्ये· द्वीपादपीत्यादिना यौ

अर्थप्रकृतयः पंच पंचावस्थासमन्विताः। यथासंख्येन जायंते मुखाद्याः पंच संधयः। २२ अंतरैकार्थसंबंधः संधिरेकान्वये सति· मुखं प्रति
मुखं गर्भः सावमर्शोपसंहृतिः। २३ मुखं बीजसमुत्पत्तिर्नानार्थरससंश्रया· अंगानि द्वादशैतस्य बीजारंभसमन्वयात्· २४ उपक्षेपः परिक
रः परिन्यासो विलोभनं युक्तिः प्राप्तिः समाधानं विधानं परिभावना· २५ उद्भेदभेदकरणान्यन्वर्थान्यथ लक्षणं· बीजन्यास उपक्षेपस्तद्बाहु
ल्यं परिक्रिया· २६

गंधरायणेन वत्सराजस्य रत्नावलीप्राप्तिहेतुभूतमनुकूलदैवं स्वव्यापारं बीजत्वेनोपक्षिप्तवान्· यथा वा वेण्यां· लाक्षागृहानलवि
षान्नसभाप्रवेशैरित्यादिना बीजस्य न्यास इत्युपक्षेपः। परिकरमाह· तद्बाहुल्यमिति· यथा रत्नावल्यां· अन्यथा कः सिद्धादेशप्रत्ययप्रार्थितायाः सिंहलेश्वरदु
हितुः समुद्रे प्रवहणभंगमग्नोत्थितायाः फलकासादनमित्यादिना सर्वथा स्पृशंति नः स्वामिनमभ्युदया इत्यंतेन बीजस्यैव बहूकरणात्· यथा वा वेण्यां· प्र
वृद्धं यद्वैरं मम खलु शिशोरेव कुरुभिरिति पद्ये· यथा वा मुद्राराक्षसे· येन मयात्समुत्थानानंदाद्य स्वनेन नयेन चंद्रगुप्तलक्ष्मीस्थैर्यसंपादनहेतोर्बीजस्याबप

परिन्यासमाह·तदिति·यथा रत्नावल्यां·प्रारंभेस्मिन्स्वामिनवृद्धिपयेन योगंधरायणः स्वव्यापारं दैवं नृपो निर्ष्पन्तिमुक्तवानिति·यथा वा मुद्राराक्षसे प्रथमेंके न किंचिस दि
रास्यते सर्वस्वमाहितमितिपदितः सर्वैरुपायैर्बीजस्यन्यासात्परिन्यासः। विलोभनमाह·गुणाख्यानमिति·यथा रत्नावल्यां·अस्तापास्तोऽतिपचे वैतालिकमुखेन चंद्रतुल्यव
त्सराजगुणवर्णनया सागरिकायाः समागमहेत्वनुरागबीजानुगुणेपनेव विलोभनाद्विलोभनं·यथा वा मुद्राराक्षसे·ऐश्वर्यादनपेतमितिपद्येन राक्षसगुणवर्णनाद्वि
लोभनं·यथा च वेणीसंहारे प्रथमेंके·मंथायस्तार्णवांभः प्लुतकुहुरमिति दिलितेन नभोपद्या विलोभनं·अथ युक्तिः। संप्रधारणमिति·यथा रत्नावल्यां प्रथमेंके·मयापि चे
नां देवीहस्तेसबहुमानं निक्षिपतेत्यारभ्य क्रमेण तो मिलितः इसं तेन सागरिकाया अंतःपुरगतायावत्सराजस्य सुखेन दर्शनादिप्रयोजनावधारणाद्युक्तः वा

तन्निष्पत्तिः परिन्यासो गुणाख्यानं विलोभनं·संप्रधारणमर्थानां युक्तिः प्राप्तिः सुखागमः॥२७॥

अन्यसिंहलेश्वरामात्ययोश्च नायकसमागम[redacted]रे तु प्रयोजन लेनावधारणाद्युक्तिः। यथा वा मुद्राराक्षसे प्रथमेंके·अत्र तावद्वृषलेत्यारभ्य प्रमाणुविप्रामीलं तः
संरंभो बीजानुगुणसंघटनप्रयोजनस्य विचारे युक्तिः। प्राप्तिमाह·प्राप्तिरिति·यथा वेणीसंहारे प्रथमेंके·चेटी·भट्टिणि परिकुविदो विअ कुमालो लक्खीअदि ता सुपश्रोमं·भी
मः। मच्छामि कौरवशतमितिपद्यानंतरं·द्रौपदी·श्रुत्वा सहर्षं·णाध अस्सुदपुव्वं रवु एदं वअणं ता पुणो विभण हि·इत्यनेन भीमक्रोधबीजान्वयेनैव सुखप्रा
प्तिरिति·यथा वा रत्नावल्यां प्रथमेंके·सागरिका·श्रुत्वा सहर्षं पश्यंती·कधं·अअं·सो·राआ·उदअणो·जस्स·तादेण·अहं·दिण्णा·ता·परप्पेसणदूसिअं मे जीअं ६
जीविदं एदस्स दंसणेण बहुमदं संवुत्तं·इति सागरिकायाः सुखावगमात्प्राप्तिरिति·२७॥ ॥●॥ ॥●॥ ॥●॥ ॥●॥ ॥●॥

अथ समाधानं लक्षयति· बीजागम इति· यथा रत्नावल्यां प्रथमेंके· वासवदत्ता· तेण हि उवणेहि उवअरणाइं इत्याद्युपक्रमे सागरिका· स्वगतं· सारिआ दाव सुसंगदा
ए हत्थे समप्पिदा पेक्खिदुं उण मे कुदूहलं ता अलक्खिदा पेक्खिस्सं· इत्यनेन वासवदत्तया रत्नावलीवत्सराजयोर्दर्शनप्रतीकारात् सागरिकायाः सुसंगताहस्तार्प
णेनालक्षितप्रेक्षणेन च वत्सराजसमागमहेतोर्बीजस्योपादानात्समाधानं· यथा वा वेण्यां प्रथमेंके· भीमः· भवतु पांचालराजतनये श्रूयतां· अचिरेणैव कालेन
चंचद्भुजेति पद्येन वेणीसंहारहेतोः क्रोधबीजस्य पुनरुपादानात्समाधानं· [redacted] विधानमाह· विधानं सुखदुःखकृदिति· यथा मालत्यां प्रथमेंके माधवः
यांत्या मुहुर्वलितेति पद्धिस्मयत्तिमिनेसनेन च मालत्यवलोकनस्य सानुरागस्य समागमहेतोर्बीजानुगुण्येनैव माधवस्य सुखदुःखकारित्वाद्विधानं· यथा वा

बीजागमः समाधानं विधानं सुखकृत्स्मृतम्॥

वेण्यां प्रथमेंके· द्रौपदी· णाह पुणो वि अ तुए आगच्छिअ समस्सासिदव्वा· भीमः· ननु पांचालराजतनये किमद्याप्यलीकाश्वासनया· भूयः परिभवक्लान्तिलज्जावि
धुरिताननं· अनिःशेषितकौरव्यं न पश्यसि वृकोदरं· इति संग्रामस्य सुखदुःखहेतुत्वाद्विधानं· यथा वा रत्नावल्यां· सागरिका राजानं दृष्ट्वा सस्पृहं निश्व
स्य· एमे मंदभाअधेआए अदिचिरं पेक्खिदुं विअ अंपाविदो इति प्रथमदर्शनसुखस्यानंतरं दुःखस्य च विधानात्· यथा वा मुद्राराक्षसे प्रथमेंके· चाणक्यः
·शत्रुप्रयुक्तानां च तीक्ष्णरसदायिनामित्यारभ्य तत्रामपुरुषाः इत्यंतं बीजस्य सुखदुःखहेतुर्विधानं॥ ॥०॥ ॥०॥ ॥०॥

अथपरिभावना·परिभावइति·यथारत्नावल्यांप्रथमेंके·सागरिका·दृष्ट्वासविस्मयं·कहंपच्चक्खोज्जेवअणंगोपूअंपडिच्छेदि ता अहंपि इह ट्ठिदा ज्जेव पूअंणिव्वत्तइस्सं·इत्यनेनवत्सरा
जस्यानंगरूपतयाअपह्नवादनंगस्यप्रसक्षस्यपूजाग्रहणस्यलोकोत्तरत्वादद्भुतरसावेशःपरिभावना·यथावेण्यांप्रथमेंके·द्रौपदी·किंदाणिंएसोपलअजलहरत्थणिदमंस
लोखणेखणेसमरदुंदुहीताडीअदि इति लोकोत्तरसमरदुंदुभिरसावेशाद्द्रौपद्याःपरिभावना·उद्भेदमाह·उद्भेदइति·यथारत्नावल्यांप्रथमेंकेवत्सराजस्यकुसुमायुधव्यपदेशेन
गूढस्यवैतालिकवचनादस्तापास्तेत्यादिनोदयनस्येत्यनेनबीजानुगुण्येनैवोद्भेदनादुद्भेदः·यथाचवेण्यांप्रथमेंके·आर्यकिमिदानीमध्यवस्यतिगुरुरित्युपक्रमेनेपथ्ये·यत्स
त्यव्रतभंगेतिपद्यानंतरं·भीमः॥सहर्षं·जृंभतां॥२॥विनयंधरसंप्रत्यप्रतिहतमंबरमार्यस्यक्रोधज्योतिरित्यनेनच्छन्नस्यद्रौपदीकेशसंयमनहेतोर्युधिष्ठिरक्रोधबीजस्योद्भे

परिभावोऽद्भुतावेशउद्भेदोगूढभेदनम्॥२८॥करणंप्रकृतारंभो

दनादुद्भेदः॥२८॥करणमाह·करणमिति·यथारत्नावल्यांप्रथमेंके·णमोदेकुसुमाउहअमोहदंसणोमेहुविस्ससित्ति·दिट्ठंजंपेक्खिदव्वंताजावणकोविपेक्खदिताविगमिस्स
मित्यनेनानंतरांकप्रस्तुतनिर्विघ्नदर्शनारंभकरणात्करणं·यथावावेण्यांप्रथमेंके·भीमः॥तेनालंचालिगच्छामोवयमिदानींकुरुकुलक्षयायेति·सहदेवः॥आर्यगच्छामइदानीं
गुरुजनानुज्ञाताआत्मविक्रमानुरूपमाचरितुंइत्यनेनानंतरांकप्रस्तूयमानसंग्रामारंभकरणात्करणं·यथावामुद्राराक्षसेप्रथमेंके·यथोक्तंक्रियतइत्सारम्भ ७
भविष्यतीत्यनेनबीजानुकूलप्रस्तुतकार्यारंभःकरणं·सर्वचोद्देशग्रंथानिर्दि[redacted]वैषम्यंक्रियाक्रमस्याविवक्षितत्वादिति॥

अथभेदमाह॰ भेदइति॰ यथावेण्यांप्रथमेंके॰ द्रौपदी॰ णाहमाक्खुजण्णसेणीपरिहवुद्दीविदकोवाअणवेक्खिदसरीरापरिक्कमिस्सध जदोअप्पमत्तसंचरणीआ
इं रिवुबलाइंसुणीअंति॰ भीमः॰ अयिसुक्षत्रियेषु॰ अन्योन्यतीसंतेनविपलायाः क्रोधाः क्रोधोत्साहबीजानुगुण्येनैवप्रोत्साहनाद्भेदइति॰ यथावामुद्राराक्षसेप्रथ
मेंकेअभाद्रेनचका[redacted]तरेणेतिपथेचाणक्येनराक्षसगुणस्यप्रोत्साहनाद्भेदः। एतानिचद्वादशमुखांगानिबीजारंभस्यद्योतकानिसाक्षात्सारंपर्येणवा
विधेयानि॰ एतेषांतुपक्षेपपरिन्यासयुक्त्युद्भेदसमाधानानामवश्यंभावितेतिमुखसंधिः। अथसांगंप्रतिमुखसंधिमाह॰ लक्ष्यालक्ष्यइवेति॰ तस्यबीजस्यकिंचि
ल्लक्ष्यःकिंचिदलक्ष्यइवोद्भेदःप्रकाशनंतत्प्रतिमुखं॰ यथारत्नावल्यांद्वितीयेंकेवत्सराजसागरिकासमागमहेतोरनुरागबीजस्यप्रथमांकोपक्षिप्तस्यसुसंगता

भेदःप्रोत्साहनामता॰ लक्ष्यालक्ष्यइवोद्भेदस्तस्यप्रतिमुखंभवेत्॰ २९॥

विदूषकाभ्यांज्ञायमानस्यतयालक्ष्यस्यवासवदत्तयाचचित्रफलकवृत्तांतेनकिंचिल्लीयमानस्यदृश्यरूपउद्भेदःप्रतिमुखसंधिः। यथावा[redacted]वे
णीसंहारेद्वितीयेंकेभीष्मादिवधेनलक्ष्यस्यकर्णाद्यवधादलक्ष्यस्यभीमक्रोधबीजस्योद्भेदः सहभृत्यगणंसबांधवंसहमित्रंससुतंसानुजं॰ स्वबलेननिहंति
संयुगेनचिरात्पांडुसुतःसुयोधनं इत्यादिभिःदुःशासनस्यहृदयक्षतजांबुपानेदुर्योधनस्यचयथागदयोरुभंगे॰ तेजःक्षितानांसमरमूर्द्धनिपांडवानांद्रे
यांजयद्रथवधोपितथाप्रतिज्ञातःसएवमादिभिश्चोद्भेदःप्रतिमुखसंधिः। यथावामुद्राराक्षसेप्रथमेंकेपूर्वंलक्षितस्यचाणक्यस्यमध्येयमपटवृत्तांतेनालक्षितस्य
चाणक्यनीतियोगबीजस्यपुनरत्रसपत्नविंदुसंबंधस्यचसेसात्॰ २९॥

बिंद्विति॰ अस्य च पूर्वांकोपक्षिप्त बिंदुरूप बीज प्रयत्नार्थानुगतार्थानि त्रयोदशांगानि भवंति तान्याह॰ विलास इति॰ नर्मद्युतिरिति च॰ २०॥२१॥ यथोद्देशं लक्षणमाह॰ र
त्यर्थेहेति॰ यथा रत्नावल्यां द्वितीयेंके॰ सागरिका॰ हिअअ प्पसीद इमिणा आआसमेत्तफलेण दुल्लहजणाणुबंधेण सारभ्य तह वि आलेक्खगदं वि तं जणं कदुअ जधा
समीहिदं करिस्सं॰ तह वि णत्थि दंसणे वा ओआ लोणाक्षि निश्चेसैनैवं वत्सराज समागमरतिं चित्रादिजन्याम पुद्दिश्य सागरिकाया श्चेष्टा सम्य प्रयत्नानुरागबी
जानुगो विलास इति॰ यथा वा मुद्राराक्षसे प्रथमेंके चरवचनानंतरं प्रतीहार्या जयशब्दे उक्ते गृहीतो जयशब्द इति चाणक्यस्य कार्यसिद्धिविषय मनोविलासः॥ अ
थ परिसर्पमाह॰ दृष्टेति॰ यथा वेण्यां द्वितीयेंके कंचुकी॰ योयं सुयोधनेषु बलवत्स्विसारभ्य॰ आशस्त्रग्रहणादकुंठ पञ्चशेशस्तस्यापि जेता मुनेस्तापायास्य न पांडुसूनुभि

बिंदुप्रयत्नानुगमादंगान्यस्य त्रयोदश॰ विलासः परिसर्पश्च विधूतं शमनर्मणी॰ २०॥ नर्मद्युतिः प्रगयनं नि
रोधः पर्युपासनं॰ वज्रं पुष्पमुपन्यासो वर्णसंहार इत्यपि॰ २१॥ रत्यर्थेहा विलासः स्याद् दृष्टनष्टानुसर्पणं परिसर्पः

स्वयं भीष्मः शरैः शातितः प्रोढानेक धनुर्धरारिविजयश्रांतस्य चैकाकिनो बालस्यायमरातिलून धनुषः प्रीतोभिमन्योर्वधात्॰ दृस्यनेन भीष्मादिवधाद् दृष्टस्याभिम
न्युवधान्नष्टस्य बलवतां पांडवानां वासुदेवसहायानां संग्रामलक्षण बिंदुरूप बीजप्रयत्नान्वयेन कंचित्कंचुकेन बीजस्यानुसर्पणं परिसर्पः॰ यथा वा रत्नाव
ल्यां सागरिकावचनाच्चित्रदर्शनाभ्यां सागरिकानुरागबीजस्य दृष्टनष्टस्य कासौ कासा विसादिना वत्सराजेनानुसर्पणं परिसर्पः॰ यथा च मुद्राराक्षसे चाणक्ये
न पत्रलेखन समये साधुवध लेखादिना पूर्वसंधौ दृष्टस्य मध्ये नष्टस्य राक्षससंग्रहरूप कार्यबीजस्यानुसरणानुसंधानात्परिसर्प इति॥ ॥ ॥ ॥ ॥

द्वितीयेंके

विधूतमाह· विधूतं स्यादरतिः· यथा रत्नावल्यां सागरिका· सहि हिअअं मे संतावो बाधेदि तालसम्भदुल्लहजणाणुराओ इसं [redacted] तेन सागरिका वीजान्वयेन शीतोपचार विधननाद्विधूतं· यथा चवेण्यां द्वितीयेंके भानुमत्याः दुःस्वप्नदर्शनेन दुर्योधनस्यानिष्टशंकया पाण्डवविजयशंकया चारतेर्विधननाद्विधूतं· यथा वा मुद्राराक्षसे प्रथमेंके कोऽस्मन्नाभिनवर्मेति नामान्युपक्षिप्य अथवा न लिखामीति इदमनिष्ठ [redacted] वस्तु नि नाम लेखने अरते विधूननमिति· अथ शममाह·तच्छमइति· [redacted] तस्याअरतेः शमउपशमः। यथा रत्नावल्यां द्वितीयेंके राजा· निर्वर्ण्य· वयस्य· तयालिखितं इमिति यत्सत्समालम्ब्यपि वकुमां नस्तलकपंन पयपामीसुपक्रमे· सागरिका· आत्मगतं· हिअअ समस्स सम णे रहाअ विदेर निअं अभिंगदाअसु

विधूतं स्यादरतिस्तच्छमः शमः। परिहासवचो नर्म धृतिस्तज्जाद्युतिर्मता· ॥३२॥

पाभ

पशमाच्छमः। यथा वा [redacted] मुद्राराक्षसे प्रथमेंके हंत दुरात्मा राक्षसो गृहीतेहंत न्हीनइसंतेन चाणक्यस्यारतेश्चिंताया उपशमाच्छम इति· ३२अथ नर्म· परिहासेति· यथा रत्नावल्यां द्वितीयेंके· सुसं· सहि जस्स कदे तुमं आअदा सो अअं पुरदो चिट्ठदि· सागसास्यं· सुसंगदे कस्स कदे अहं आअदा· सुसं· अम अप्पसंकिदे णं चित्तफलअस्स ता गेह्णु एद मित्यनेन नूवीजान्वितं परिहासवचनं· यथा वेण्यां द्वितीयेंके दुर्योधनः। चेटीहस्तादर्घमादाय देव्याः समर्पयति·पुनर्भानुमती· अर्घ्यं दला· हलाउवणेहि कुसुमाइं आणएणं दिदेवदाणं सपरिआणि वचनेति· इति हस्तौ प्रसारयति दुर्यो·पुष्पाण्यर्पयति·भानुमसाकान्त्स्पर्शजातकंपायाहस्तात्पुष्पाणि पतंतीत्यनेन नर्मणा दुःस्वप्नदर्शनोपशमार्थदेवतापूजा विघ्नकारिणा बीजोद्घाटनात्स्परिहासस्य प्रतिमुखांगत्वमुक्तं· यथा वा मुद्राराक्षसे प्रथमेंके चाणक्यः भोः श्रेष्ठिन्नामेवं वदेत्यादिना चंदनदासानिसंधानार्थं परिहासवाक्यं नर्म· अथ नर्मधुतिमाह· धृतिरिति· यथा रत्नावल्यां द्वितीयेंके· सुसं· सहि अदाक्खिणदाणिं सि तुमं मभि

अथप्रगयनं॰१

सोत्तरेति॰ यथा रत्नावल्यां द्वितीयेंके॰ विदूषकः॰ भो वअस्स दिट्ठिआ वड्ढसे॰ राजा॰ सकौतुकं॰ वयस्य किमेतत्॰ इत्यारभ्य॰ परिच्युत इति पद्यांतेन राजविदूषकसागरिकासुसंगताना मन्योन्यवचनेनोत्तरोत्तरानुरागबीजोद्घाटनात्प्रगयनं॰ अथ निरोधमाह॰ हितरोध इति॰ यथा रत्नावल्यां द्वितीयेंके॰ राजा॰ धिङ्मूर्ख॰ आमाकथमपीतिपद्येन वत्सराजस्य सागरिकासमागमरूपस्य वासवदत्ता[redacted]प्रवेशसूचकेन विदूषकवचसा निरोधान्निरोधनं॰ यथा वा मुद्राराक्षसे प्रथमेंके दृष्टव्यं एवेसनेन कुसुमनाहितागमनायस्वे च्छसिद्धये चंदनदासस्य राक्षसहितभूतस्य निरोधनान्निरोधः॰ अथ पर्युपासनमाह॰ पर्युपास्तिरिति॰ यथा रत्नावल्यां द्वितीयेंके॰ प्रसीदेति ब्रूयामितिपद्येन चित्र

सोत्तरा वाक्प्रगयनं हितरोधो निरोधनम्॰ [redacted] पर्युपास्तिरनुनयः पुष्पं वाक्यं विशेषवत्॰ ३३॥

दर्शनात्कुपिताया वासवदत्ताया अनुनयान्नायकनायिकयोरनुरागोद्घाटनान्वयेन पर्युपासनम्॰ यथा वा मुद्राराक्षसे प्रथमेंके॰ चाणक्यः॰ भद्र कस्मिंश्चिद्विषये त्वां नियो क्ष्यामि इत्यनेन नेपथ्यजनस्यानुनयात्पर्युपासनं॰ अथ पुष्पमाह॰ पुष्पमिति॰ यथा रत्नावल्यां द्वितीयेंके॰ राजा॰ सागरिकां हस्ते गृहीत्वा स्पर्शं सुखं नाटयति॰ विदूषकः॰ भो एसा तुए इत्यारभ्य राजा॰ श्रीरेषा पाणिरप्यस्याः इत्यनेन नायकयोः साक्षात्स्पर्शनादिना सविशेषानुरागोद्घाटनात्पुष्पं॰ यथा वा मुद्राराक्षसे प्रथमेंके॰ चा णक्यः॰ चंद्रगुप्तममात्यराक्षसं राक्षसमेकेत्यसौ लिमामेवं मंस्था इत्यारभ्य कर्त्रं क्षारं वचं चंद्रगुप्तनृपतेः कर्तुं व्यवस्येत्पद्यगिलं[redacted]तेन स्वाम्यनुरागप्रकाशकं वि शिष्टं वचनं पुष्पम्॰ ॥ ३३॥

शिवः
९

अथोपन्यासमाह उपन्यास इति· यथा रत्ना· द्वि· अं· सुसं· महा अलं संकाए इस्स पसायस्य कुपिता सही सागरिआ ता पसीददु इत्यंतेन सुसंगतावचसा·
सागरिकाप्रत्यभिज्ञातसागरिकायाश्चत्वमिति सत्यतावाग्वचनयाबीजोद्भेदादुपन्यासः· यथा वा मुद्राराक्षसे· प्रथमेंके· चंदनदासः॥ अकि[?] अं
इमादोज एगदोइ छ्यी अदीत्यादिराजानुरागहेतुर्वाक्यरचना ११ अथ वज्रं वज्रमिति यथा रत्ना· द्वितीयेंके वासवदत्ता फलकं निर्दिश्य अज्ज
उत्त एसावि· आतुइ समीवे इस्स उपक्कस्य चित्तकम्म पेक्खंती एसी सव्वे अगास मुप्पसोतिअनेंमहसक्सानिष्ठुरमभिहितं· यथा वा मुद्रा· प्र· के· चाणक्ये
न भवाने वेत्यादिना चंदनदासं प्रति निष्ठुरमभिधानाद्वज्रम १२ अथ वर्णसंहारमाह· चातुर्वर्ण्यमिति यथा वीरचरिते तृतीयेंके· परिषदियमृषी
५२

उपन्यासो याग्रवचनाद्वज्रं प्रत्यक्षनिष्ठुरं चातुर्वर्ण्योपगमनं वर्णसंहार इष्यते ३८

णामिति पद्येन ऋषिक्षत्रियामात्यादीनां संगतानां वचसा रामविजयाशंसिना परशुरामदुर्नयस्याद्रोहयाज्ञाद्वारेणोद्भेदनाद्वर्णसंहारः यथा
मुद्रा· प्रथमेंके चाणक्येन येयाताः किमिति प्रधार्यैतिपद्येन सर्वा अपि प्रहृतयः सुखेन यांतु नतद्बलं वेनाहंकार्यं साधये किंतु सर्वेभ्यो बुद्धेरेवेति· च
तुर्वर्णनिर्वर्णनं वर्णसंहार उक्तः १३ एतानि त्रयोदश प्रतिमुखांगानि मुखसंधु पक्षिप्तबिंदुलक्षणार्थान्तरबीजप्रयत्नानुगुणप्तातानि विधेया
नि एतेषां च मध्ये परिसर्पप्रणयनवज्रोपन्यासपुष्पाणां प्राधान्यमितरेषां यथासंभवं प्रयोग इति ३८
५१

अथ गर्भसंधिमाह गर्भस्तु दृष्टनष्टस्येति प्रतिमुखसंधौ लक्ष्यालक्ष्यरूपतया स्तोकोद्भिन्नस्य बीजस्य सविशेषोद्भेदपूर्वकः सांतरायो लाभः पुन
र्विच्छेदः पुनः प्राप्तिः पुनर्विच्छेदः पुनश्च तस्यैवान्वेषणं वारं वारं सो निर्द्धारितैकांतफलप्राप्त्याशा गर्भसंधिरिति तत्र चौत्सुक्यत्वेनप्रासायाः पता
कायाः अनियमं दर्शयति पताका स्यान्न वेति प्राप्तिसंभवस्तु स्यादेवेति दर्शयति स्यादि ति यथा रत्नावल्यां द्वितीयेंके वत्सराजस्य वासवदत्तालक्ष
णोपायेन तद्वेषपरिग्रहं सागरिकाभिसरणोपायेन विदूषकवचसा सागरिकाप्राप्त्याशा प्रथमं पुनर्वासवदत्तया विच्छेदः पुनः प्राप्तिः पुन

·अंतरायेन·४८

गर्भस्तु दृष्टनष्टस्य बीजस्यान्वेषणं मुहुः द्वादशांगः पताका स्यान्न वा स्यात्प्राप्तिसंभवः ३५ अभूताहरणं मार्गो रूपोदा
हरणे क्रमः संग्रहश्चानुमानं च तोटकाधिबले तथा ३६ उद्वेगसंभ्रमाक्षेपा लक्षणं च प्रणीयते ३७

विच्छेदं पुनरपायनिवारणोपायान्वेषणं नास्ति देवीप्रसादनं मुक्त्वा अन्य उपाय इत्यनेन दर्शितामिति यथा मुद्रा॰ द्वितीयेंके कौटिल्यधीर
रज्जुनिबद्धेति पद्ये उपायापशंकाभ्यां मौर्यलक्ष्मीस्थैर्यरूपायाः प्राप्तेः संभवः स च द्वादशांगो भवति तान्युद्दिशति अभूताहरणमितिसा
र्द्धेन ३६ ३७ यथोद्देशं लक्षणमाह अभूताहरणं छद्मेति यथा रत्ना॰ तृतीयेंके कांचनमाला साहु रे वसंतअ साहु अदिसइओ
अमच्चो जोअंधराअणो इमाए संधिविग्गहचिंताए इत्यादिना प्रवेशकेन गृहीतवासवदत्तावेषायाः सागरिकाया वत्सराजाभि १०

सरसांच्छ्यमविदूषकसुसंगताकृतसंकोचनमालानुवादद्वारेण दर्शितमिसमस्ताहरसां यथा वेशपांतृतीयेंके अभ्यत्या माहतइति एथास्तनुनास्मच्छमुत्ते
तिपद्येम्‌ तवचनेनपुष्टिश्चिरस्मच्छ्प्रवचनमुक्तम्‌ यथावा मुद्राराक्षसे द्वितीयेंके आहितुंडिकच्छ्प्रधारिसोविराधगुप्तस्यासर्वं प्राकृतवचनं प्रस्तुतो यथो
गिछ्‌ प्रावरणां मस्ततस्यराक्षसं प्रतिकुसुमपुरवृत्तांतकथनस्याप यो गिछ्‌ प्रावरणादमस्ताहरणम्‌ १ मार्गइति यथारत्नां तृतीयेंके विदूषकः
दिट्ठिआ वड्ढसि समीहिदा [redacted] ए कज्जसिद्धीए राजा वयस्यकुशलंप्रियायाः रम्यारम्या। विदू करोंकथयत्येवमेवमित्यंतेन यथा विदूषकेण

श्रमताहरसांच्छ्प्रमार्गस्तत्वार्थकीर्तनम्‌ २

सागरिकासमागमः सूचितः तथैव निश्चितरूपोराज्ञोनिवेदित इति तत्वार्थकथनं यथावा मुद्राराक्षसे द्वितीयेंके नेदंविस्मृतमसृतिना नविषपयासं
गमच्छान्मनेतिराक्षसस्यतत्वार्थकथनमितिमार्गः २ रूपमाह रूपमितिपथारत्नां तृतीयेंके राजा अहो किमपि कामिजनस्य स्वगृहिणी समा
गमपरिभाविनोऽभिनवंजनं प्रतिपक्षपातः तथाहि मरायविशदांवक्त्रे द्दष्टिं ददातीति आस्यकथं चिरयति वसंतकः किंनखलुविदितः स्या
दयंववृत्तोदेव्याः इत्यनेन रत्नावलीसमागमप्राप्त्याशानुगुणयमेवदेवीशंका याभ्रवितर्करूपं यथामुद्रा द्वि के रा

क्षमः भगवति कमलालये भ्रशमगुरुता ज्ञाति यतः आनंदहेतुमपि देवमयपास्येत्यारभ्य अपि चाविनीते तदहमाश्रयो न्मलनेनैव त्वामकामं करोमीत्यंतेराक्षसस्य वितर्कप्रतिपादनेरूपमिति ३ उदाहरणमाह सोत्कर्षमिति यथा रत्ना॰ रत्नी यें के॰ विदू॰ सहर्षं ही ही भो कोसंवीरज्जलाहेण॰ विं॰ ने॰ तारिसो॰ वअस्सस्स॰ परिओसो॰ आसि॰ जारिसो मह सयासादो॰ पिअवअणं सुणिय॰ भविस्सदित्ति तर्कमि इत्यनेन रत्नावलीप्राप्तिवार्ता कौशांबीलाभादति रिच्यत इति उत्कर्षाभिधानादुदाहरणं॰ यथा वेणीसं॰ नं॰ के॰ पोयः शस्त्रं बिभर्ति स्वभुजगुरुमदइति अश्वत्थाम्नः स्वोत्कर्षस्याभिधानात् यथा मुद्राराः द्वि॰ के॰ मया तावत्सुहृत्तमस्य चंदनदासस्येत्यारभ्य इष्टात्मजः सपदीति पद्यांतं राक्षसेन स्वोत्कर्षाभिधानादुदाह

रूपं विशेषवद्वाक्यं सोत्कर्षस्यादुदाहृतिः ३८ क्रमः संचिन्त्यमानाप्तिः ५

रणं ८ क्रमः संचिन्त्यमानेति यथा रत्ना॰ रत्नी॰ राजा॰ उपनतप्रियासमागमस्यापि मे किमिदमित्यारभ्य विदू॰ आकर्ण्य भोदिस्साणिए एसो॰ पिअवअस्सो तुमं जेव्व॰ उद्दिसिअ॰ उक्कंठानिब्भरं मंतेदि॰ ता णिवेदेमि से तुहागमणं इत्यंतेन वत्सराजस्य चिन्त्यमानसागरिकासमागमस्य [redacted] सागरिकाप्राप्तिः यथा मुद्रा॰ द्वि॰ के॰ पाऊराणि सवसेसं इति गाथावाचनानंतरं स्वगतं॰ अपेकुसुमपुरवृत्तांतज्ञोमवत्स्त्रशिखिरितिगाथार्थः इत्यनेन पूर्वं द्वारिकस्तिष्ठतीति कुसुमपुरवृत्तांतहरचारागमनस्य संचिंतितस्य प्राप्तेः ५ ११

क्रमांतरं मतं भेदेनाह भावज्ञानमिति यथा रत्ना॰ ततो राजा प्रियेसागरिके शीतांशुर्मुखमुत्पले इति आरभ्य किंपद्मस्य रुचिमित्यंते नवासवद
त्तया वत्सराजस्य भावज्ञानात् क्रमांतरं यथा वा मुद्रा॰ द्विती॰ पाऊसा शिखसे समिति गाथार्थ भावज्ञा क्रमः ५ अथ संग्रहः संग्रह इति यथा रत्ना॰ त
ती॰ राजा साधु वयस्य साधु इदं ते पारितोषिकं इति कटकं ददाति इति सामदानाभ्यां विदूषकस्य सागरिकासमागमकारिणः संग्रहात् संग्र
हः यथा वा मुद्रा॰ द्विती॰ केनाद्येन भूषणानि परिधाप्य स्वस्ति भवते साधयाम्यहं इति कंचुकिवचनं सामदानरूपम् ६ अथ अभ्यूह इति यथा रत्ना॰

भाव ज्ञानमथापरे संग्रहः सामदानोक्तिरभ्यूहो लिंगतोनुमा ३८

ततो राजा धिङ्मूर्ख त्वत्कृत एवायमापतितोस्माकमनर्थः कुतः समारूढप्रीतिः प्रणयबहुमानात् प्रतिदिनं व्यलीकं वीक्ष्येदं कृतमकृतपू
र्वं खलु मया प्रियामुंचत्यद्य स्फुटमसहना जीवितमसौ प्रकृष्टस्य प्रेम्णः स्खलितमविषह्यं हि भवति विदू॰ भो अस्स वासवदत्ता किं करिस्स
दित्ति रा॰ जाणामि सा अरिआ उण दुक्करं जीविस्सदित्ति॰ तर्के मीत्पत्रप्रकृष्टप्रेमस्खलनेन सागरिकानुरागजन्येन वासवदत्ताया मरणाभ्यू
हनमनुमानं यथा वा मुद्रा॰ द्वि॰ क॰ राक्षसः यत्कमोहितेडिकछ प्रमादि राधागुप्तेनाने न भवितव्यमिति राक्षसे नाभ्यूहनादनुमानं ३८

नाटयज्ञेयमुक्तमंगिक्कालापभाज्ञा

द·रु·टी· अथाधिबलम्· अतिसंधिरिति· यथा रत्नावल्यां· रती· कांचनमाला· भट्टिणि इअं सा चित्तसालिआ वसंत अस्स सण्णं करेमि छोटिकां ददा
१२ तीत्यादिना वासवदत्ता कांचनमालिकाभ्यां सागरिकासुसंगता वेषाभ्यां राजविदूषकयोरतिसंधीयमानत्वादधिबलमिति यथा मुद्रा· द्वि·
12 कार्यव्यग्रत्वान्मनसः प्रभूतत्वाच्च मणिधीनां विस्मृतं इदानीं स्मृतिरुपलब्धा· इत्यनेन इष्टजनानुसंधानादधिबलम्· अथ तोटकं संरब्धमिति
यथा रत्ना· तः· वासवदत्ताउपसृत्य· जुत्तं एदं सरिसं एदं पुनः सरोषं अज्जउत्तउत्तिहि· किं अज्जवि· अहि जादि एसे आदुःखमराऊभवी आदि·
ति

अतिसंधिर्ह्यधिबलं संरब्धं तोटकं वचः ८

कंचनमाले एदे राज्ञो अलदापासेराः वं धिअ· आरोहि· एदं दुट्ठबम्हणं· एदं पि दुट्ठ कस्य अं अग्गादो करेहीत्यंते नवासवदत्तासंरब्धव
चसा सागरिकासमागमांतरायभूतेनानियतमासकारिणा तोटकमुक्तं· यथा वेणी· रती· प्रपलपरिबोधितः स्कतिमिरघशेषे निशामित्या
दिना· धृतायुधो यावदहं तावदन्यैः किमायुधैरित्यंतेनाश्वत्थाम्नः कर्णाभ्युत्थानोसंरब्धवचसा सेनाभेदकारिणा पांडवविजयप्राप्त्याशान्वितं तो
टकं· यथा वा मुद्रा· द्विती· राक्षसः शस्त्रमाकृष्य ससंभ्रमं· अयि मयि स्थिते कः कुसुमपुरमुपरोत्स्यति· प्रवीरक प्रवीरक क्षिप्रमिदानीं प्राकारं परितः श रम
रासनधरैः क्षिप्रं परिक्रम्यतामित्यादिना· विराधः अमात्यालमावेगेन नवद्यत्यमिदं वर्पितइत्यंते राक्षसस्य संरंभवचनं तोटकमिति ८ १२

मतांतरेणाधिक्लतोटकेलक्षणमिति तोटकस्यान्यथाभाव इति यथा रत्ना॰ तृती॰ राजा॰ देवि एवमपि प्रत्यक्षदृष्टव्यलीकः किं विज्ञापयामि॰
आताम्रतामपनयामि विलक्ष एव लाक्षाकृतां चरणयोस्तव देवि मूर्ध्ना कोपोपरागजनितां तु मुखेन्दुबिंबे हर्तुं क्षमो यदि परं करुणा मयि स्या
त् इत्यनेन तोटकान्यथाभावस्यासंरब्धवचसा राज्ञोक्तत्वात्तोटकमाह॰ संरब्धवचनमिति यथा रत्ना॰ ३ राजा॰ प्रिये वासवदत्ते प्रसीद २ वास
वादत्ता अश्रूणि विधारयन्ती अज्जउत्त मा॰ एव्वं भण॰ अण्णसंकिदाइं॰ एदाइं अक्खराइं इति वासवदत्तायाः संरब्धवचनोक्तिः॰ य
था वेणीं॰ ५ राजा सुंदरक कच्चित्कुशलमंगराजस्य॰ पुरुषः कुशलं शरीरमात्रेण त्यादिना॰ राजा॰ ससंभ्रमम् कथमित्येवमादिना संरब्धव

तोटकस्यान्यथाभावं ब्रुवते धिबलं परे संरब्धवचनं यत्तु तोटकं सम्प्रचक्षते ८०
उद्वेगो रिपुता भीतिः शंकात्रासो च विभ्रमः ११

चसा तोटकमिति ८० उद्वेग इति यथा रत्ना॰ तृती॰ सागरिका॰ स्वगतं॰ कहिं अकिदपुण्णो हिं॰ अत्तणो इच्छाए॰ मरिदुं॰ ण पारिअदि॰ इत्यने
न वासवदत्तातः सागरिकायाः भयमित्युद्वेगः यो हि यस्यापकारी स तस्यारिः यथा वेणीं॰ ५ सूतः भ्रातस्त्वामुपयम॰ कथमासन्न एवासौ कौ
रवराजपुत्रमहावनोत्पातमारुतो मारुतिरित्यारभ्य अनार्यमाचरिष्यतीत्येतं अर्पितं उद्वेगः यथा वा मुद्रा॰ २ राक्षसः सोद्वेगमात्मगतं कु
तश्चाणाक्यवटोः परितोषः अफलप्रयत्नं विफलं वा दाहयन्मर्मणाः प्रयत्नमधिच्छामीति राक्षसस्य चाणाक्यसकाशादुद्वेगः १०

र॰टी॰ १२ 13 शंकात्रासाविति यथा रत्नावल्यां ३ विदू॰ पश्य पश्य त्रुटेः ससंभ्रमं का उ एए ग्गाकहं दे ई या सवदृन्ता अप्पाणं वावादेदि राजा ससंभ्रममुपसृत्य क्वासा
विसन्नेन वा सवदृन्ता बुद्धिगृहीता याः सागरिकायाः मरणाशंकया संभ्रम इति यथा वेण्यां ३ के नेपथ्ये कलकलः ॥ अश्वत्थामा ससंभ्रममात्
मन् कथं एष अस्मत्प्रतीज्ञाभंगभीरुः किरीटी समं शरवर्षैः दुर्योधनराधेयावभिद्रवति सर्वथा पीतं शोणितं दुःशासनस्य भीमेनेयं का तथा तेनयां २
प्रविश्य सप्रहारः संभ्रांतः सूतः त्रायतां २ कुमार इति त्रासश्चैते तावल्यां त्रासशंकाभ्यां दुःशासनद्रोणवधसूचकाभ्यां पांडवविजयप्रख्याशान्वि

गर्भबीजसमुद्भेदादाक्षेपः परिकीर्तितः ५२

तः संभ्रमः यथा वा मुद्रा॰ द्विती॰ राक्षसः वामाक्षिस्पंदनं सूचयित्वा आत्म॰ कथं प्रथममेव सर्पदर्शनं अयं राक्षसस्य भयशंकाकृतः संभ्रम
इति ११ आक्षेपमाह गर्भेति यथा रत्नाव॰ ततो॰ राजा च पश्य देवीप्रसादनं मुक्त्वा नान्यमत्रोपायं पश्यामि॰ पुनः क्रमांतरे सर्वथा देवीप्रसा श्रिव
दनं प्रति निःप्रत्याशीभूताः स्म पुनस्तत्किमिह स्थितेन देवीमेव गत्वा प्रसादयामीत्यनेन देवीप्रसादायत्तासागरिकागम[redacted]सि १२
द्धिरिति गर्भबीजोद्भेदादाक्षेपः यथा वेण्यां ४ अंके सुंदरकः अथवा किमेष्य देवं उवालहामि तस्स खु

एवंशिष्टेऽप्यस्मिन्दविदूरवञ्चनादौबीजस्यपरिमर्देऽपि सां दामहहितेनोवदेकुशलस्स·मडाशियोत्याहरणपहूमलस्सजइविसमसाहिलो·पंचालीके
सगाहणकुसुमस्सफलमितिमनेनबीजमेवफलोन्मुखतयाऽऽक्षिप्तमित्याक्षेपः यथामुद्रा· द्विती· विराधः ततश्चाणक्यहतकेनेत्यादिना चा
णक्यबीजसमुद्भेदादाक्षेपः २२ एतानिद्वादशगर्भांगानिप्राप्त्याशाप्रदर्शकत्वेनोपनिबंधनीयान्येषां चमध्येऽभूताहरणमार्ग
तोटकाधिबलाक्षेपाणांप्राधान्यमितिसंगोगर्भसंधिरुक्तः ४१ अथावमर्शसंधिः क्रोधेनेति अवमर्शनमवमर्शः पर्यालोचनंतच्चक्रो
धेनवाव्यसनाद्वाविलोभनेनवाभवितव्यमनेनार्थेनेत्यवधारितैकांतफलप्राप्त्यध्यवसायात्मागर्भसंभिन्नबीजार्थसंबंधोवि

क्रोधेनावमृशेद्यत्रव्यसनाद्वाविलोभनात्
गर्भनिर्भिन्नबीजार्थःसोऽवमर्शइतिस्मृतः ४२

मर्शोऽवमर्शः यथारत्नावल्यां चतुर्थेऽङ्के अग्निविद्रवपर्यंतोवासवदत्ताप्रसत्त्यानिरपायरत्नावलीप्राप्त्यध्यवसायात्मावमर्शोदर्शितः यथा
वेण्यां षष्ठेऽङ्के दुर्योधनरक्षाकृतभीमसेनागमपर्यंतः युधिष्ठिरः निश्वस्य विचिंत्य तीर्णोभीष्ममहोदधावित्यत्रस्वल्पावशेषेजयइत्या
दिभिर्विजयप्रत्यर्थिसमस्तभीष्मादिमहारथवधादवधारितैकांतविजयावमर्शनंदर्शितं यथावामुद्रा· गर्भेसंधौप्रसिद्धस्यमुहु
रन्विष्टचाणक्यनीतिरूपबीजस्यकौमुदीमहोत्सवप्रतिषेधात्मनाप्रकरीनाम्न्याल्पयाकथयाविमर्शनादनुसंधानात् ४२

द॰रू॰टी विमर्शसंधेरंगान्याह॰ तत्रापवादेतिसार्धैन ४३ यथोद्देशलक्षणमाह॰ दोषेति॰ यथारत्ना॰ ४ सुसंगता सा खु तवस्सिणी भट्टि

१५ णीए उज्जेणिं॰ पेसिदत्ति॰ पवादं॰ करिअ उवत्थिदे॰ आइरत्ते॰ ण जाणामी अदि॰ कहिं पि णीदेत्ति॰ विदू॰ सोद्वेगं अदिणिग्घिणं खु

14 किदं देवीए॰ इत्यारभ्य॰ भो वअस्स मा अस्सहा संभावेसि॰ सा खु देवीए॰ उज्जइणीए पेसिदा॰ अदो अप्पिअं॰ त्ति॰ णा॰ कहिदं॰ राजा॰

अहो निरनुरोधा मयि देवीसंतंवादसंवदन्तादोषप्रख्यापनादपवादः यथा वेण्यां॰ षष्ठे॰ युधिष्ठिरः पांचालकक च्चिद्दासादितातस्य दु

रात्मनः कौरवापसदस्य पदवी॰ पांचालकेवलं पदवीके शस्पर्शपातकप्रधानहेतुरुपलब्धुरित्यनेन दुर्योधनदोषप्रख्यापनादपवा

तत्रापवादसंफेटौ विद्रवद्रवशक्तयः॰ द्युतिः प्रसंगश्छलनं व्यवसायो विरोधनं ४३ प्ररो
चनाविचलनमादानं च त्रयोदश दोषप्रख्यापवादः स्या १ संफेटो रोषभाषणम् २ ४४

दः यथा वा मु॰ तृती॰ चाणक्यः स्मितं कृत्वा उपालब्धुं तर्हि वयमाहूता इति चाणक्येन सोपालंभरूपदोषस्य प्रख्यापनादपवादः १

संफेट इति यथा वेण्यां षष्ठे॰ ततश्च वृकोदरेणाभिहितं॰ अपि भो कौरवराजकृतं बंधुजनोद्देशेन मन्युना मैव विषादं कृथाः शव

इत्यारभ्य क्रोधाधिक्षेपपरुषवाक्कलहप्रस्तावितघोरसंग्रामा वियंतेन भीमदुर्योधनयोरन्योन्यरोषभाषणादिजपवीजान्वयेन १८

संफेट इति॰ यथा मुद्रा॰ तृतीये॰ वैतालिकाः राज्ञा सुवर्णशतसहस्रं दापने चाणक्यः सक्रोधं॰ वैहीनरेति छै तदा दिराजचाणक्ययोरोष

संभाषणात्संफेटः २ ४८ से

विद्रवइति।यथाछलितरामे।लवः।येनावृत्यमुखानिसामपठतामत्यंतमायासितंबाल्याद्येनहृताक्षसूत्रवलयप्रत्यर्पणैःक्रीडितं।युष्माकंहृदयंसएवविशिखैरापू
रितांसस्थलोमूर्छाघोरतमःप्रवेशविवशोबद्धालवोनीयते।यथावा।रत्नावल्यांचतुर्थेंके।नेपथ्येमहान्कलकलः।हर्म्याणांहेमपुष्पद्युतिमित्यादि।पुनर्वासवदत्ता।
णकखुअज्जउत्तेणकारणेणअज्जउत्तेणमिएसाअमएणिग्घिणएहिअआएसंजदासाअरिआविवज्जदीत्यनेनसागरिकावधबंधाभिधानाद्विद्रवः।यथाचमुद्राराक्षसेतृती
येंके।गंधेराबद्धचक्रमितिपद्येवधरूपोविद्रवः।द्रवइति।यथोत्तररामचरितेपंचमेंके।लवः।अथवाशांतंपापं।वृद्धास्तेनविचारणीयचरितास्तिष्ठंत्वितिपद्येलवोरा
मस्यगुरोस्तिरस्कारंकृतवान्।यथावावेण्यांषष्ठेंके।युधिष्ठिरः।भगवन्कृष्णाग्रजसुभद्राभ्रातः।ज्ञातिप्रीतिर्मनसिनकृतेत्यादिनायुधिष्ठिरेणबलभद्रस्यतिरस्करणं
यथावामुद्राराक्षसेतृतीयेंके।चंद्रगुप्तेनचाणक्यस्यअस्मेनैवेदमनुष्ठितमित्यादिनातिरस्करणाद्द्रवः।विरोधशमनमिति।यथारत्नावल्यांचतुर्थेंके।सव्याजैःशपथै

विद्रवोवधबंधादिर्द्रवोगुरुतिरस्कृतिः।विरोधशमनंशक्तिस्तर्जनोद्वेजनेद्युतिः॥४५॥

रित्यनेनसागरिकालाभविरोधिवासवदत्ताकोपशमनाच्छक्तिः।यथावोत्तररामचरितेषष्ठेंके।लवः।विरोधोविश्रांतइतिपद्ये।यथावावेण्यांपंचमेंके।कुर्वंत्वाप्ताहतानामितिनोसा
दिभीमेनशक्तिः।यथावामुद्राराक्षसेतृतीयेंके।चाणक्यः।वृषलनयापरितंप्रतिविधातुं।राजा।किमकौशलादुतप्रयोजनापेक्षया।चाणक्यः।कथमकौशलंभविष्यति।प्रयोजनापे
क्षयैवेत्यादिकिमकौशलादितिकार्यविरोधेप्रष्टुस्तस्यविरोधस्यशमनाच्छक्तिः।तर्जनेति।यथावेण्यांषष्ठेंके।एतद्भुवनमुपप्लुत्यरामानुजस्येत्यारभ्यजन्मेंदोरित्यादिनः
सक्रोधितःसरभसंदृष्टस्तेनदुर्वचनजल्पादलोऽनाभ्यांदुर्योधनतर्जनोद्वेजनकारिभ्यांपांडवविजयानुकूलदुर्योधनोत्थापनहेतुभ्यांभीमस्यद्युतिरुक्ता।यथावामुद्रारा
क्षसेतृतीयेंके।राजा।अस्मेनैवेदमनुष्ठितं।चाणक्यः।आःकेनेत्यादिकातर्जनरूपाद्युतिः॥४५॥

गुरुकीर्त्तनमिति॰ यथा रत्नावल्यां चतुर्थेऽङ्के मासौ सिंहलेश्वरसुता रत्नावली नामायुष्मती वासवदत्थासुपभुसदेवायत्तं प्रार्थितासती प्रतिदत्तेस्सेनेन रत्नावलीलाभा
त्कुड्मलाभिजनप्रकाशि नाप्रसंगाद्गुरुकीर्त्तनेनप्रसंगः॰ यथा वा मृच्छकटिकायां॰ चंडालः॰ एसोसाअलदत्तसुओ अज्जविश्वदत्तस्स णत्तू चारुदत्तोवावादिदुं व
ज्झट्ठाणं णिज्जदि एदेण किल गणिआ वसंतसेणिआ सुवण्णलोहेण वावादिद त्ति॰ चारुदत्तः॰ मखशतपरिपूतमित्यादिना चारुदत्तवधाभ्युदयानुकूलप्रसंगाद्गुरुकी
र्त्तनं॰ यथा वा मुद्राराक्षसे तृतीयेऽङ्के॰ अंभोधीनां तमालप्रभवकिसलयश्यामवेलावनानामापारेभ्यश्चतुर्णां चटुलतिमिकुलक्षोभितान्तर्जलानां॰ मालेवाम्लानपुष्पा नवनृप
तिशतैरुह्यमाना शिरोभिः सामय्येव स्खलन्ती कथयति विनयालंकृतं ते प्रभुत्वमित्यादि गुरुकीर्त्तनं॰ छलनमिति॰ यथा रत्नावल्यां चतुर्थेऽङ्के॰ राजा॰ अहो निरोधाम्रयिदेवीस
नेनवासवदत्तायाइष्टासंपादनाद्वत्सराजस्यावमाननाच्छलनमिति॰ यथा वा मुद्राराक्षसे तृतीयेऽङ्के॰ राजा॰ सकोपं॰ आर्य एवं सर्वत्र निरुद्धचेष्टाप्रसरेण सारभ्यैतेन स्वबक

गुरुकीर्त्तनं प्रसंगश्छलनं चावमाननम्॰ व्यवसायः स्वशक्त्युक्तिः

र्णेणपभिपुज्जामरे इत्यादिना गुरोश्चाणक्यस्यावमाननाच्छलनं॰ व्यवसाय इति॰ यथा रत्नावल्यां चतुर्थेऽङ्के ऐन्द्रजालिकः॰ किं धरणीए मिअंको आआसे महिअरो जले जा
लणो॰ मज्झ विपओ दाविज्जउ देहि आणत्तिं अहवा किं बहुणा जंपिएण मज्झ पइण्णा एसा भणामि हिअएण जं महसि दट्ठुं तं दावेमि फुडं गुरुणो मंतप्पभावेण
नेनैन्द्रजालिको मिथ्यार्थः संभ्रमोत्थापनेन वत्सराजस्य हृदयस्थसागरिकादर्शनानुकूलां स्वशक्तिमाविष्कृतवानिति॰ यथा वा वेण्यां षष्ठेऽङ्के॰ नूनं तेनाद्य वीरेण प्रति
युधिष्ठिरः स्वदं इत्यादि शक्तिमाविश्चकारेति॰ यथा च मुद्राराक्षसे तृतीयेऽङ्के॰ चाणक्यः॰ विहस्य॰ एतत्त्त्वं राक्षसेनानया पुन नेज्ञातं॰ नन्दमिव नवं ते मुखुत्स्य मया पुनर्भ
वानिव क्रतल्ले मलयकेतुराधिराज्यपदे नियोजयितव्य इति॰ इदं राक्षसनीतिविद्भिर्वाक्षेपार्थं सोत्प्रासवचनेन स्वशक्तिप्रशंसनं व्यवसायः॥ ॥०॥ ॥ शिवः
१५

संरब्धोक्तिरिति· यथा वेणीसंहारे पंचमेंके· राजा· रे रे मरुत्तनय किमेवं वृद्धस्य राज्ञः पुरो निंदितमात्मकर्म श्लाघसे· अपि च· कृष्णाकेशेषु भार्येसारम्य शोकं स्त्रीवन्यपनसलिलिरिति
राज्ञः दुरात्मन् भरतकुलापसद पांडवपशो नाहं भवानिव विकत्थनाप्रगल्भः। किंतु द्रक्ष्यंति न सुरासुतं इत्यादिना संरब्धयोः स्वशक्त्युक्तिर्विरोधनं· यथा वा मुद्राराक्षसे
तृतीयेंके· चाणक्यः। हे वृषल विद्वांसः प्रमाणयंतु· राजा· विद्वांसोप्यविकत्थना भवंति· इत्यादिना क्रोधसंरब्धयोरन्योन्याधिक्षेपोक्तिर्विरोधनं· [redacted] सिद्धे
ति· यथा वेणीसंहारे षष्ठेंके· पांचालकः। अहं देवेन चक्रपाणिनेत्युपक्रम्य कृतं संदेहेन प्रपूर्यंतां सलिलेन रत्नकलशा राज्याभिषेकाय इत्यादिना मंगलानि कर्तुमाज्ञापयति दे
वो युधिष्ठिर इत्यनेन द्रौपदीकेशसंयमनयुधिष्ठिरराज्याभिषेकयोर्भाविनोः प्रसिद्धत्वेन दर्शिका प्ररोचना· विकत्थनेति· यथा वेणीसंहारे पंचमेंके· भीमः। तात अंब सक
लरिपुजयाशांतिः अपि च· तातः चूर्णिताशेषकौरव्य इत्यनेन विजयबीजानुगतस्वगुणाविष्करणाद्विचलनं· यथा वा रत्नावल्यां चतुर्थेंके यौगंधरायणः। देव्या मद्वच

संरब्धोक्तिर्विरोधनं·८६। सिद्धामंत्रणतो भाविदर्शिका स्यात्प्ररोचना· विकत्थना विचलनमादानं कार्यसंग्रहः॥८७॥

नाद्यथेत्यनेनान्यपरेणापि यौगंधरायणेन मया जगत्स्वामित्वानुबंधी कन्यालाभो वत्सराजस्य कृत इत्यनेन स्वगुणाविष्करणं विचलनं· आदानमिति· यथा वेणीसंहारे षष्ठेंके भी
मः ननु भोः समंतपंचकसंचारिणः रक्षो नाहं मिसा इत्यादिना समस्तरिपु [redacted] कार्यस्य संग्रहः। यथा वा रत्नावल्यां चतुर्थेंके· सागरिका· दिशो विलोक्य· दिट्ठिआ समंत
दो पज्जलिदो भअवं हुदवहो अज्ज करिस्सदि दुःखावसाणं इत्यनेन दुःखावसानकार्यस्य संग्रहः। यथा वा जगत्स्वामित्वलाभः प्रभोरिति· यथा च मुद्राराक्षसे चतु
र्थेंके· राक्षसः। वामाक्षिस्पंदनं सूचयित्वेत्यादि प्रस्तावगमना प्रतिपादयतीत्यनेन कार्यसंग्रहणं चाणक्यकृतं कस्य राक्षसातिसंधानरूपस्य कार्यस्य राक्षसेनैव दुरुपश्रुति
दुःशकुनवशात्संग्रहणादादानं· इत्येतानि त्रयोदशावमर्शांगानि तत्रैतेषामपवादशक्तिप्ररोचनादानानि प्रधानानीति ज्ञेयं·८७॥

अथनिर्वहणसंधिः॥वीजवंतइति॰यथावेणीसंहारेषष्ठेंके॰कंचुकी॰उपसृत्यसहर्षं॰महाराजवर्द्धसे॰अयंखलुकुमारभीमसेनःसुयोधनक्षतजारुणीकृतसकलशरीरोदुर्लक्ष्यव्यक्ति
रित्यादिनाद्रौपदीकेशसंयमनादिमुखसंध्यादिवीजानांनिजपावकानांपक्षिप्तानामेकार्थयोजनं॰यथावारत्नावल्यांचतुर्थेंकेसागरिकारत्नमालावसुभूतिवाभ्रव्यादीनामर्था
नांमुखसंध्यादिषुप्रकीर्णानांवत्सराजेककार्यार्थत्वं॰वसुभूतिः॥सागरिकांनिर्वर्ण्यापवार्य॰वाभ्रव्यसुसदृशीयंराजपुत्र्याइत्यादिनादर्शितं॰यथाचमुद्राराक्षसेपंचमेंके॰प्र
विषयपुरुषः॥जेदुजेदुकुमारो॰अज्जगुम्मसाएणधुक्कंदोदीहनस्सवोविस्सवेदि॥इत्युपक्रमसमाप्तिपर्यंतंप्रथमेंकेकिमन्यलिखामीत्यादिनाएवमेवेत्यंतेनोपक्षिप्तस्यवीजस्या
नेकधाप्रकीर्णस्यैककार्यीकरणमितिनिर्वहणसंधिः॥अथास्यांगान्याह॥साधनं॰संधिरिति॰४९॥यथोद्देशंलक्षणमाह॰संधिर्वीजोपगमनमिति॰यथारत्नावल्यां॰वसुभूतिः॥वाभ्रव्यसुस
दृशीयंराजपुत्र्या॰वाभ्रव्यः॥ममाप्येवमेवप्रतिभातीत्यनेननायिकावीजोपगमनात्संधिः॥यथावावेणीसंहारेषष्ठेंके॰भीमः॥भवतियज्ञवेदिसंभवेस्मरतिभवतीयन्मयोक्तंचंचद्भुजेतीस

वीजवंतोमुखाद्यर्थाविप्रकीर्णायथायथं॰एकार्थ्यमुपनीयंतेयत्रनिर्वहणंहितत्॥४८॥संधिर्विरोधोग्रथनं॥निर्णयःपरिभाषणं॰
प्रसादानंदसमयाःकृतिर्भाषोपगूहनं॰पूर्वभावोपसंहारौप्रशस्तिश्चचतुर्दश॥संधिर्वीजोपगमनंविरोधःकार्यमार्गणं॰५०॥

नेनोपक्षिप्तस्यवीजस्यपुनरुपगमनात्संधिः॥यथावामुद्राराक्षसेपंचमांकारंभेसिद्धार्थकस्यप्रवेशेनवीजस्यचाणक्यनीतेरुपगमनान्निर्वहणांग्यसंधिः॥विरोधमाह॰विरो
धइति॰यथारत्नावल्यांचतुर्थेंकेवसुभूतिः॥निरूप्य॰कुतस्तेयंकन्यका॰राजा॰देवीजानाति॰वासवदत्ता॰अज्जएसासुपत्ताम्ह॰राजा॰आत्मगतं॰यौगंधरायणेनन्यस्ताकथमनवे
मामनिवेद्यकथयिष्यतीत्यनेनरत्नावलीरूपकार्यान्वेषणाद्विरोधः॥यथावावेणीसंहारेषष्ठेंके॰भीमः॥मुंचतुमामार्यःक्षणमेकं॰युधिष्ठिरः॥किमपरमवशिष्टं॰भीमः॥संयमामि
तुपक्राम्य॰युधिष्ठिरः॥गच्छतुभवाननुभवतुतपस्विनीवेणीसंहारमित्यनेनकेशसंयमनकार्यस्यान्वेषणं॰यथावामुद्राराक्षसेपंचमेंकेसिद्धार्थकक्षपणकयोर्विवादेक्ष
पणकः॥सावगगच्छदुहोदुदेकज्जसिद्धीअरहंतविभाउनाअणहमुद्दंओचेमीत्यनेनक्षपणकेनचिकीर्षितमहाप्रमादजनसिद्ध्यर्थमुद्रायाचनेव्याजेनमार्गणमिति

विरोधो...कार्यमार्गणमिति॥५०॥

ग्रथनमिति। यथा रत्नावल्यां चतुर्थेंके। यौगंधरायणः। देव क्षम्यतां यद्देवस्यानिवेद्य मयैतत्कृतमित्यनेन वत्सराजस्य रत्नावलीप्रापणकार्योपक्षेपाद्ग्रथनं। यथा वा वेण्यां षष्ठें-
के। भीमः। पांचालि न खलु मयि जीवति संहर्तव्या दुःशासनविलुलिता वेणिरात्मपाणिना। तिष्ठतु स्वयमेवाहं संहरामीत्यनेन द्रौपदीकेशसंयमनकार्यस्योपक्षेपाद्ग्र-
थनं। यथा वा मुद्राराक्षसे पंचमेंके। भागुरायणः। स्वगतं। कष्टमेवमेवमपि नामास्मासु स्नेहवान्कुमारो मलयकेतुरतिसंधातव्य इत्यहो दुष्करं। अथवा कुले लज्जायां चेतिहस-
नेन कार्यस्य मलयकेत्वतिसंधानेन राक्षसवशीकरणरूपस्योपक्षेपाद्ग्रथनं। निर्णयमाह। अनुभूताख्यातिरिति। यथा रत्नावल्यां चतुर्थेंके। यौगंधरायणः। कृतांजलिः। देव श्रू-
यतामियं सिंहलेश्वरदुहिता सिंहलेश्वरदुहिता सिद्धादेशेनोपदिष्टेत्युपक्रम्य तदा लावाणके देवी दग्धेत्युपक्रम्य इति प्रसिद्धिमुत्पाद्य तदन्तिकं बाभ्रव्यः प्रेषित इत्यनेन यौगं-
धरायणः स्वानुभूतमर्थं ख्यापितवान्। यथा वा वेण्यां षष्ठेंके। भीमः। देव देव अजातशत्रो अद्यापि दुर्योधनहतकः। मया हि तस्य दुरात्मनो भूमौ क्षिप्तं शरीरमित्यनेन स्वानुभू-

ग्रथनं तदुपक्षेपोऽनुभूताख्यातु निर्णयः। परिभाषा मिथो जल्पः प्रसादः पर्युपासनम्॥५१॥

तार्थस्य भीमेन कथनात्। यथा वा मुद्राराक्षसे पंचमेंके। क्षपणकः। स्वगतं। अभिश्रुतं मलयकेतुहतकेन कृतार्थोऽस्मीत्यनेन बीजस्यानुगुणं कार्यं मलयकेतुराक्षसयोर्विरोधरूपं
तस्य प्रख्यापनात्कथनान्निर्णय इति। परिभाषणमिति। यथा रत्नावल्यां चतुर्थेंके। रत्नावली। आत्मगतं। किदावराहा देवीए ण सक्कुणोमि मुहं दंसेदुं। वासवदत्ता। सास्रं। इदु-
पक्रम्य। वासवदत्ता। वसुभूतिं निर्दिश्य। अज्ज अमच्चजोअंधराअणेण आउलीकिदम्हि। जेण जाणंतेण वि ण णिवेदिदं म्हीत्यनेनान्योन्यपरिवादात्परिभाषणं। यथा वा
वेण्यां षष्ठेंके। भीमः। कृष्टा येनासि राज्ञां सदसि नृपशुनेत्यादिना क्वासौ भानुमती कथं नोपहसति पांडवदारानित्यनेन परिभाषणं। यथा वा मुद्राराक्षसे पंचमेंके। भागुरायणः। अ-
दंतयोर्मिथो जल्पनं परिभाषणं। प्रसाद इति। यथा रत्नावल्यां चतुर्थेंके। देव क्षम्यतामित्यादि। यथा वा वेण्यां षष्ठेंके। भीमः। द्रौपदीमुपसृत्य। देवि पांचालराजतनये दिष्ट्या वर्धसे रिपुकु-
लक्षयेणेत्यनेन द्रौपद्या भीमेनाराधितत्वात्प्रसादः। यथा वा मुद्राराक्षसे पंचमेंके। भागुरायणेनाक्रमावेगेनेत्युपक्रम्य नंदवस्तुनि नोपालंभनीयो राक्षसः आनंदराज्यलाभाद्

आनंदइति·यथारत्नावल्यांचतुर्थेंके·राजा·यथाहदेवी·रत्नावलींगृहाणेति·यथाचवेणीसंहारेषष्ठेंके·द्रौपदी·णाधविसुमरिदह्मिएदंवावारंणाधस्सपसादेणपुणोविसिक्खिस्सं·केशान्बध्ना
ति·यथावामुद्राराक्षसेसप्तमेंके·राजा·विगुणीकृतकार्मुकोपिसैन्यैःप्रार्थितरत्नावलीभालकेशसंयमन राक्षसमात्रि मानितरूपैदानंदः समयइति·यथारत्नावल्यांचतुर्थे
के·वासवदत्तारत्नावलीमालिंग्य·समस्ससबहिणिसमस्सस इत्यनेनभगिन्योरन्योन्यसमागमेनदुःखनिर्गमनात्समयः।यथाचवेणीसंहारेषष्ठेंके·युधिष्ठिरः।भगवन्कुतस्तस्यसुधि
विजयादन्यद्यस्यभगवान्पुरस्थःस्वयमेवनारायणोमंगलान्याशास्तेहंतगुरुमरुदादिक्षोभेणेत्यादिनायुधिष्ठिरस्यदुःखापगमदर्शनात्यथाचमुद्राराक्षसेसप्तमेंकेचाणक
ःसर्वे·अयेऽयममात्यराक्षसःयेनमहात्मनागुरुभिःकल्पनाक्लेशैर्दीर्घप्रसनेनचाणक्यदुःखापनयनात्कृतिरिति·यथारत्नावल्यांचतुर्थेंके·राजा·कोदेव्याःप्रसादंनबहुम

आनंदोवांछितावाप्तिःसमयोदुःखनिर्गमः॥
कृतिर्लब्धार्थशमनंमानाद्याप्तिश्चभाषणम् ५२॥

न्यते·वासवदत्ता·अज्जउत्तदूरेसेमादुउलंतातधाकरेहिजहणबंधुअणंणसुमरेदीसहि त्यन्यवचसालब्धायारत्नावल्याराज्ञोऽनुशिष्टेकृतपशमनात्कृतिः·यथावावेणीसंहारेषष्ठेंके
भीमसेनः।एतेखलुभगवंतोव्यासवाल्मीकिजामदग्न्यजाबालिप्रभृतयोरुद्राभिषेकंधारयंतस्तिष्ठंतीत्यनेनप्राप्तराज्यस्याभिषेकमंगलैःस्थिरीकरणंकृतिः·यथा
वामुद्राराक्षसेसप्तमेंके·चाणक्यः।वृषलवृषलअमात्यराक्षसेनाद्यगृहीतोऽसिदिष्ट्यावर्धतेभवान्·राजा·एषप्रसादआर्यस्यअनुमतेनानुभूयतइत्यनेनराज्यस्थिरीकर
णात्कृतिः।अथभाषणं·मानाद्याप्तिरिति·यथारत्नावल्यांचतुर्थेंके·राजा·अतःपरमपिप्रियमस्ति·नीतोविक्रमबाहुरात्मवशतामित्यनेनकामार्थमानाद्याप्ते शिवः
ताभाषणमिति·यथावावेणीसंहारेयुधिष्ठिरः।पयपतुदकः।क्रोधांधैःसकलंहतंरिपुकुलमित्यादिनाभाषणं·यथावामुद्राराक्षसेसप्तमेंके·राक्षसः।प्रकामं·विमुग्धमन ९७
कःसर्वकार्यप्रतिपत्तिहेतवेसुहृदेमहात्मकागतिःप्रक्रोशमीत्यादिनाभाषणं·५२।

अपपूर्वभावो ऽस्य प्रत्येकं कथयन्ति · कार्यदर्शीति · यथा रत्नावल्यां चतुर्थेऽङ्के · यौगंधरायणः । एवं विज्ञाय भगिन्याः संप्रतिकरणीये देवी प्रमाणं · वासवदत्ता · अज्जउत्त किं ण भणसि पडिवा
दिदेहि से रअणमालिं ति इत्यनेन वत्सराज आपरत्नावली दीयतामिति कार्यस्य यौगंधरायणेनानुपदिष्टस्य वासवदत्तया दर्शनात्पूर्वभाव इति · यथा वा वेणीसंहारे षष्ठेऽङ्के · भीमः बुद्धिमति
कंक मातः सुमतीपुत्रि भवतु संप्रति पाण्डवानि नित्यथा च मुद्राराक्षसे सप्तमेऽङ्के · चाणक्यः । अमात्य निवेद्यतामात्मा राक्षसमायसो ऽयमिदानीं आनीतेऽद्य इष्टकार्यदर्शनं पूर्वभावः । अ
द्भुतप्राप्तिस्तु यथा वेण्यां षष्ठेऽङ्के · नेपथ्ये · भ्रातः समन्तानलदग्धशेषाय त्वामिति भवने राजन्यलोकाय · कौंतेयः सोऽतिमुधिष्ठिरः । देवि एवमेतेनकृतं आनां संरोभिनंदितो नभस्त
लसंचारिणा सिद्धजनेनेत्यनेनाद्भुतार्थप्राप्तिः कल्पान्तजलसामिदमित्रकृतनि पिधद्धि · यथा वा मुद्राराक्षसे सप्तमेऽङ्के · ततः प्रविशति जवनिकान्तरवसन्तमातंगत्रयु
श्याणक्यः । अनञ्जनकथपथकेनोत्तुंगजटा कलापकपिलो वक्त्रपटान्ते शिखीसाधुपमानेनाद्भुतराक्षसप्राप्तिरित्यद्भुतप्राप्तिरूपगूहनं · वराप्तिरिति · यथा सर्वत्र · कीर्तने

कार्यदृष्ट्यद्भुतप्राप्ती पूर्वभावोपगूहने · वराप्तिः काव्यसंहारः प्रशस्तिः शुभशंसनम् · ५५ ।

नृपः प्रियमनुपकरोमीत्यनेन काव्यार्थस्य संहरणात्काव्यसंहारः । प्रशस्तिरिति · यथा वेण्यां · प्रीततरश्चेद्भगवांस्तदिदमस्तु · अकृपणमतिः कामं जीयाज्जनः पुरुषायुषं भगवति भक्तिर्द्वै
तविनापुरुषोत्तमे · कलितभुवनो विद्वद्बन्धुर्गुणेषु विशेषवान्सततसुकृती भूयाद्भूपः प्रसादितमण्डल इति · यथा वा रत्नावल्यां · तथापीदमस्तु · भरतवाक्यं · उर्वीमुद्दामसस्यां जन
यतु विसृजन्वासवो वृष्टिमिष्टामिष्टैस्त्रैविष्टपानां विदधतु विधिवत्प्रीणनं विप्रमुख्याः । आकल्पान्तं च भूयात्स्थिरसमुपचितसंगतिः सज्जनानां निःशेषं यान्तु शान्तिं पिशुनज
नवचो दुर्जना वज्रलेपमिति · यथा च मुद्राराक्षसे · तथापीदमस्तु · भरतवाक्यं · वाराहीमात्मयोनेस्तनुमवनविधावास्थितः स्वानुरूपां यस्य प्राग्दन्तकोटिं प्रलयपरिगता शिश्रिये
भूतधात्री · म्लेच्छैरुद्विज्यमाना भुजयुगमधुना संश्रिता राजमूर्तेः स श्रीमद्बन्धुभृत्यश्चिरमवतु महीं पार्थिवश्चन्द्रगुप्तः इत्यादि · अथामीषां मनागपि विलसनानि चतुर्दश निर्वहणाङ्गा

षट्प्रकारं चांगानां प्रयोजनमित्याह उक्तांगानामिति। मानिप्रयोजनान्याह इष्टस्येति। विवक्षितार्थनिबंधनं गोप्यार्थगोपनं प्रकाश्यार्थप्रकाशनं अभिनेयरागवृद्धिः चमत्कारित्वं काव्यस्येतिवृत्त
स्य विस्तरश्चेत्यंगैरेभिः षट्प्रयोजनानि संपद्यंत इति। ५४। पुनर्वस्तुविभागमाह द्वेधेति। ५५। कीदृक्तत्सूच्यं कीदृग्दृश्यश्रव्यमित्याह नीरसोनुचित इति। ५६। सूच्यप्रतिपादनप्रकार
माह अर्थोपक्षेपकैरिति। ५७। तत्र विष्कंभकं लक्षयति वृत्तेति। अतीतानां भाविनां च कथावयवानां ज्ञापको मध्यमेन मध्यमाभ्यां वा पात्राभ्यां प्रयोजितो विष्कंभकः। स द्विविध
शुद्धः संकीर्णश्चेत्याह एकेति। एकेन द्वाभ्यां वा मध्यमपात्राभ्यां शुद्धो भवति। मध्यमाधमपात्रैर्युगपत्संकीर्ण इति। ५८। अथ प्रवेशकमाह तद्वदेवेति। तद्वदेवेत्यनेन भूतभ
विष्यदर्थज्ञापकत्वमतिदिश्यते। अनुदात्तोक्त्या नीचैश्च पात्रैः प्रयोजित इति विष्कंभकलक्षणापवादः। अंकद्वयस्यांतरित्यनेन प्रथमांके प्रतिषेधः। ६०। अथ चूलिका अंतर्जवनि

उक्तांगानां चतुःषष्टिः षोढा चैषां प्रयोजनं। इष्टस्यार्थस्य रचना गोप्यगुप्तिः प्रकाशनं। ५४। रागः प्रयोगस्याश्चर्यं वृत्तांतस्यानुपक्षयः।
द्वेधा विभागः कर्त्तव्यः सर्वस्यापीह वस्तुनः। ५५। सूच्यमेव भवेत्किंचिद्दृश्यश्रव्यमथापरं। नीरसोनुचितस्तत्र संसूच्यो वस्तुविस्तरः। ५६।
दृश्यस्तु मधुरोदात्तरसभावनिरंतरः। अर्थोपक्षेपकैः सूच्यं पंचभिः प्रतिपादयेत्। ५७। विष्कंभचूलिकांकास्यांकावतारप्रवेशकैः। वृत्त
वर्तिष्यमाणानां कथांशानां निदर्शकः। संक्षिप्तार्थस्तु विष्कंभो मध्यपात्रप्रयोजितः [redacted] एकानेककृतः शुद्धः संकीर्णो नीचमध्यमैः। तद्वदे
वानुदात्तोक्त्या नीचपात्रप्रयोजितः [redacted] प्रवेशोंकद्वयस्यांतः शेषार्थस्योपसूचकः। अंतर्जवनिकासंस्थैश्चूलिकार्थस्य सूचना। ॥६०॥

केति। नेपथ्यपात्रेणार्थस्य सूचनं चूलिकेति। यथोत्तररामचरिते द्वितीयांकादौ। नेपथ्ये। स्वागतं भोस्तपोधनायाः। ततः प्रविशति तपोधनेति नेपथ्यपात्रेणात्रेयी वासंतिकयात्रेय्याः सूचना
चूलिका। यथा वीरचरिते चतुर्थांकस्यादौ। नेपथ्ये। भो भो वैमानिकाः प्रवर्त्यंतां रंगमंगलानि। कृशाश्वांतेवासी सादितस्तु नेपथ्यपात्रैर्देवैः रामेण परशुरामो जित इति सूचना
चूलिका। यथा च मुद्राराक्षसे सप्तमीयेंके। नेपथ्ये। इतइतो देव इत्यनेन नेपथ्यपात्रैरेव चंद्रगुप्तप्रवेशसूचनाच्चूलिका। ६०॥ ॥ ॥६०॥ ॥६०॥

अथांकास्यं अंकांतपात्रैरिति॰ अंकांत एव पात्रैः अंकांतपात्रैः तेन विश्लिष्टस्योत्तरांकामुखस्य सूचनं तद्वशेनोत्तरांकावतारः अंकास्यं यथा वीरचरिते द्वितीयांकांते॰ प्रविश्य सुमंत्रः॥ भगवं
तौ वसिष्ठविश्वामित्रौ सभार्गवावुपानाह्वयतः इतस्तु पत्रामनः [redacted] वगच्छाम इत्यंकसमाप्तिः॥ ततः प्रविशंत्युपविष्टाः वसिष्ठविश्वामित्रपरशुरामाः इत्यत्र पूर्वां
कांत एव प्रविष्टेन सुमंत्रपात्रेण शतानंदजनककथाविच्छेदे उत्तरांकमुखस्य सूचनादंकास्यमिति॥ यथा वा मुद्राराक्षसे द्वितीयांकांते ततः प्रविशत्यासनस्थः पुरुषेणानुगम्यमानः स
चिवो राक्षस इत्यनेन प्रथमांकांते चाणक्येन मलयकेतुना निगृह्यमाणमिति राक्षसस्य तस्य नीतिप्रयोगस्य वक्ष्यमाणस्य सूचनादंकास्यमिति॥ ६१॥ अथांकावतारः॥ अंकावतार इति॥ य

अंकांतपात्रैरंकास्यं छिन्नांकस्यार्थसूचनात्॥ ६१॥ अंकावतारस्त्वंकां[redacted]नपातोंकस्याविभागतः॥ एभिः संसूचयेत्
सूच्यं दृश्यमंकैः प्रदर्शयेत्॥ ६२॥ नाट्यधर्ममपेक्ष्यैतत्पुनर्वस्तु त्रिधेष्यते॥ सर्वेषां नियतस्यैव श्राव्यमश्राव्यमेव च॥ ६३॥
सर्वश्राव्यं प्रकाशं स्यादश्राव्यं स्वगतं मतं॥ द्विधान्यन्नाट्यधर्माख्यं जनांतमपवारितं॥ ६४॥

त्रप्रविष्टपात्रेण सूचितमेव पूर्वांकाविच्छिन्नार्थतयैवांकांतरमापततीति प्रवेशकाविष्कंभकादिशून्यमंकावतारः॥ यथा मालविकाग्निमित्रे प्रथमांकांते॰ विदूषकः॥ तेण हि दुवे वि देवी
ए पेक्खागिहं गदुअ संगीदोवअरणं करिअ तत्तभवदो दूदं विसज्जेध। अहवा मुदंगसद्दो ज्जेव णं उट्ठावइस्सदि॥ इत्युपक्रमे मृदंगशब्दश्रवणादनंतरं सर्व एव पात्राणि
प्रथमांकप्रक्रांतानि पात्रसंक्रांतिदर्शनं द्वितीयांकादावारभंत इति प्रथमांकार्थाविच्छेदेनैव द्वितीयांकस्यावतरणादंकावतार इति॥ यथा वा मुद्राराक्षसे चतुर्थेंके कः पुरुषः
प्रवेशस्य समये राक्षसः आत्मगतं॥ कस्मिन्प्रयोजनेन मयायं प्रहित इति प्रयोजनानां बाहुल्यान्न खल्ववगच्छामि राक्षसं प्रति धावनको वक्ष्यमाणस्य चाणक्यमौर्ययोर्मिथो
विरोधस्य पूर्वांकानुगमनादंकावतरणं॥ ६२॥ पुनस्त्रिधा वस्तुविभागमाह॥ नाट्यधर्ममिति॥ केन प्रकारेण त्रैधं तदाह॥ सर्वेषामिति॥ ६३॥ सर्वश्राव्यमिति॥ तत्र श्राव्यं यद्वस्तु तत्प्रका

तत्रअनांनिकमाह॰ त्रिपकताकेति॰ यस्मिन्नर्थं तस्मांनतेअर्थेसर्वाङ्गुलिंवक्रानामिकं त्रिपताकाकरं कृत्वाऽन्येनसहमन्त्रंअन्येनज्ञ नांनिकमिति॰ ६४ अपवारितमाह॰ रहस्यमिति॰ प
राहृत्यान्यस्मरहस्यकथनमपवारितमिति॰ [redacted]नाघुथर्मप्रसंगात्दाकाशभाषितमाह॰ किंब्रवीषीत्यादि॰ स्पष्टोर्थः॥ ६५ अन्यान्यपिनाघुथर्मत्वेनप्रथमकल्प्यादीनिकेचिद्दुदाहृतानि
मिनेधांचाभावनीयत्वान्नममाआग्रसिद्धानांकेषांचिद्देशभाषात्मकत्वान्नाघुधर्मत्वाभावात्लक्षणंभाक्तमिति॰ तिडपसंहरति॰ इत्याद्यशेषमिति॰ वस्तु विभेदजातं यत्तु वर्णनीयं तत्स
विभेदजातंनानाभेदाः रामायणादिकथां च गुणादीनिर्मितां विभाव्य आलोच्य नदनुगं तदनुगं नेत्रिति॰ नेत्रावक्ष्यमाणलक्षणः तत्साध्वनेयानानुगुण्याश्चित्राविचित्राकथा

त्रिपताकाकरेणान्यान्नपवार्य[redacted]न्तराकथा॰ अन्योन्यामन्त्रणं यत्स्यात्तज्जनांतेजनांतिकं॰ ६४ रहस्यं कथ्यतेन्यस्य
पराहृत्यापवारितं॰ किंब्रवीष्येवमित्यादिविनापात्रंब्रवीतियत्॰ श्रुत्वेवानुक्तमप्येकं तत्स्यादाकाशभाषितं॰ ६५ इत्या
द्यशेषमिहवस्तुविभेदजातं रामायणादि च विभाव्य बृहत्कथां च आसूत्रयेत्तदनुनेतृरसानुगुण्याच्चित्रांकथा
मुचितचारुवचः प्रपंचैः॥६७॥ ॥इतिदशरूपकालंकारे प्रथम उद्योतः॥ ॥१॥

मारभ्यापिकांचाकरिणियानिवध्नांमिनेधांप्रपंचैः॥ विलासैर्वाक्ययेतद अनुयथयेत॰ तत्र बृहत्कथामूलं मुद्राराक्षसं॰ चाणक्यनाम्नातेनाथशकटालगृहे रहः। कृत्यांविधायसहसा सपुत्रोनिहतोनृपः [redacted]॥ योगानंदयशःशेषे पूर्वनंदसुतस्ततः। चंद्रगुप्तः कृतोराज्ये चाणक्येन महौजसेति बृहत्कथायांसूचितं॰ श्रीरामायणोक्तं रामकथादि कृत्स्नं तु वीरचरिता
दि॰ आदिपदाज्जानकीराघवं नाटकं अभिज्ञानशाकुंतलादि॰ यान्यहृत्[redacted]मभिज्ञानशाकुंतलादि॥ ॥इतिश्रीदशरूपकावलोके ध्वनिकहरीनाटकांगव्याख्यानं नाम प्रथमः प्रकाशः॥ ॥१॥

एवंरूपाणामन्योन्यभेदादसंख्येयं वस्तु भेदं प्रतिपाद्येदानीं नायकभेदः प्रतिपाद्यते· नेनेत्यादिश्लोकद्वयेन· नेता नायकः विनयादिगुणसंपन्नो भवति· तत्र विनीतो यथा· यद्ब्रह्मवादिभिरुपासित
वंद्यपादे विद्यातपोव्रतनिधौ तपसां वरिष्ठे· दैवात्कृतस्त्वयि मया विनयापचारस्तत्र प्रसीद भगवन्नयमंजलिस्ते· मधुरः प्रियदर्शनः सयथा· राम राम नयनाभिरामतामाशयस्य सदृ
शीं समुद्वहन्· अप्रमेयगुणरामणीयकः सर्वथैव हृदयंगमोसि मे· त्यागी यथा· कर्णस्त्वचं शिबिर्मांसं जीवं जीमूतवाहनः· ददौ दधीचिरस्थीनि नास्त्यदेयं महात्मनां· दक्षः क्षिप्रका
री यथा· स्फूर्जद्वज्रसहस्रनिर्मितमिव प्रादुर्भवत्यग्रतो रामस्य त्रिपुरांतकृद्दिविषदां तेजोभिरिद्धं धनुः। शुंडारः कलभेन यद्वदचले वत्सेन दोर्दंडकस्तस्मिन्नाहित एव गर्जित
गुणं कृष्टं च भग्नं च तत्· प्रियंवदो यथा· उत्पत्तिर्जमदग्नितः स भगवान्देवः पिनाकी गुरुर्वीर्यं यत्तु न तद्गिरां पथि ननु व्यक्तं हि तत्कर्मभिः। त्यागः सप्तसमुद्रमुद्रितमहीनिर्व्याज

नेता विनीतो मधुरस्त्यागी दक्षः प्रियंवदः· रक्तलोकः शुचिर्वाग्मी रूढवंशः स्थिरो युवा·१। बुद्ध्युत्साहस्मृतिप्रज्ञाकलामानसमन्वितः। शूरो दृ
ढश्च तेजस्वी शास्त्रचक्षुश्च धार्मिकः।२। भेदैश्चतुर्धा ललितशांतोदात्तोद्धतैरयं·

दानावधिः सत्यसंभ्रलनपोनिधेर्भगवतः किं किं न लोकोत्तरं· रक्तलोको यथा· त्रय्यास्त्राता यस्तवायं तनूजस्तेनैवाद्य स्वामिनस्ते प्रसादात्· राजन्वत्सो राममद्रेण राज्ञा लब्धं दंसः पूर्ण
कामाश्चरेम· एवं शौचादिष्वप्युदाहार्यं· तत्र शौचं मनोनैर्मल्यादिकामाद्यनभिभूतत्वं· यथा रघौ षोडशे सर्गे· कातस्य भुजेकस्य परिग्रहो वेत्यादि· वाग्मी यथा· बाहोर्बलं न विदितं न च का
र्मुकस्य त्रैयंबकं तनिमा न त एष दोषः। तच्चापलं परशुराम मम क्षमस्व डिंभस्य दुर्विनि––पुरेषु रूढंवंशो यथा· ये चत्वारो दिनकरकुलक्षत्रसंतानमल्लीमालाम्लानरत्न
वकमधुपा जज्ञिरे राजपुत्राः। रामस्तेषामचरमभवस्ताटकाकालरात्रिप्रत्यूषो यमसुचरितकथाकंदलीकंदमूलः। स्थिरो वाङ्मनः क्रियाभिरचंचलः· यथा· प्रायश्चित्तं कारिष्यामि
पूज्यानां वो व्यतिक्रमात्· न त्वेवं दूषयिष्यामि शस्त्रग्रहमहाव्रतं· यथा वा· आरभ्यते न खलु विघ्नभयेन नीचैः प्रारभ्य विघ्नविहता विरमंति मध्याः। विघ्नैः पुनः पुनरपि प्रतिहन्यमानाः प्रार
भ्यमुत्तमगुणा न परित्यजंति· युवा प्रसिद्धः।१। बुद्ध्युत्साहेति· बुद्धिर्ज्ञानं· गृहीतविशेषकरी तु प्रज्ञा· यथा मालविकाग्निमित्रे मालविकामुपदिश्यतेन मया तस्यै· तत्तत्क्रियोपकरणात्प्रत्युपदिशतीव मे बा का· स्यमनन्यत्वानेतृविशेषाभावात्· भेदैर्विति·

प्रभेदस्य लक्षणमाह· निश्चिन्तो धीरललितः कलासक्तः सुखी मृदुः सचिवादिविहितयोगक्षेमत्वाच्चिन्तारहितः अत एव गीतादिकलाविष्टो भोगप्रवणश्च शृङ्गारप्रधानत्वाच्च सुकुमारसत्वाचारो मृदुरिति· यथा रत्ना
वल्यां वत्सराजः राज्यं निर्जितशत्रु योग्यसचिवे न्यस्तः सम्यक्पालनलालिताः प्रशान्ताशेषोपसर्गाः प्रजाः प्रद्योतस्य सुता वसन्तसमयस्त्वं चेति नाम्ना धृतिं कामः
काममुपैतु पर्यं मम पुनर्मन्ये महानुत्सवः ॥ [redacted] अथ धीरप्रशान्तः सामान्येति· विनयादिनेतृसामान्यगुणयोगी धीरप्रशान्तो द्विजादिक इति विप्रवणिक्सचिवादीनां प्रकरणनेतॄ
णामुपलक्षणं [redacted] विवक्षितं चैतत् तेन नैश्चिन्त्यादिगुणसम्भवेऽपि विप्रादीनां शान्ततैव न लालित्यं यथा मालतीमाधवमृच्छकटिकादौ माधवचारुदत्तादिः यथा तत्र
दयगिरेरिवैक एव स्फुरितगुणगुम्फितसुन्दरः कलावान् इत्युन्नतगतिमतोत्सवस्य ... नयनवतामुदियाय बालचन्द्रः ॥ यथा वा मखशतपरिपूतं गोत्रमुद्भासितं यत्सदसि निबिड
चैत्यब्रह्मघोषैः पुरस्तात् मम निधनदशायां वर्तमानस्य पापैस्तदसदृशमनुष्यैर्घुष्यते घोषणायां ॥ अथ धीरोदात्तः महासत्त्व इति· महासत्त्वः शोकक्रोधाद्यनभिभूतान्तःकरणः अ

निश्चिन्तो धीरललितः कलासक्तः सुखी मृदुः । सामान्यगुणयुक्तस्तु धीरशान्तो द्विजादिकः ॥ ३ ॥ महासत्त्वोऽतिगम्भीरः क्षमावाननविकत्थनः । स्थिरो निगूढाहंकारो धीरोदात्तो दृढव्रतः ॥ ४ ॥ ॥

विकत्थनो नात्मश्लाघनः निगूढाहंकारो विनयच्छन्नावलेपः दृढव्रतोऽङ्गीकृतनिर्वाहकः यथा जीमूतवाहनः । शिरामुखैः
स्यन्दत एव रक्तमद्यापि देहे मम मांसमस्ति· तृप्तिं न पश्यामि तवापि तावत्किं भक्षणात्त्वं विरतो गरुत्मन्· यथा वा रामं प्रति· आहूतस्याभिषेकाय विसृष्टस्य वनाय च· न मया लक्षितस्तस्य स्वल्पो
प्याकारविभ्रमः । ननु कथं वीर्यादिसामान्यगुणानामपि विशेषलक्षणे चित्तकीर्तनं तेषां तत्राधिक्यप्रतिपादनार्थं ननु च कथं जीमूतवाहनादिर्नागानन्दादौ धीरोदात्त उच्यते·
औदात्त्यं हि नाम सर्वोत्कर्षेण वृत्तिः तच्च विजिगीषुत्व एवोपपद्यते· जीमूतवाहनो हि निर्जिगीषुतया कविनैव प्रतिपादितः । तिष्ठन् भाति पितुः पुरो भुवि यथा सिंहासने किं तथा यत्संवा
हनतः सुखं हि चरणौ तातस्य किं राज्यके· किं भुक्ते भुवनत्रये धृतिरसौ भुक्तोज्झिते या गुरोः आयासः खलु राज्यमुज्झितगुरोस्तन्नास्ति कश्चिद्गुणः इत्यादिना· पित्रोर्विधातुं शुश्रूषां त्यक्त्वैश्व
र्यं क्रमागतं· वनं याम्यहमप्येष यथा जीमूतवाहनः इत्यादिना च अतोऽस्यासीत्तः शमप्रधानत्वात् परमकारुणिकत्वाच्च वीतरागवच्छान्तता· अन्यच्चात्रायुक्तं· यत्तथाभूतं राज्यसुखं सो [redacted] ना

यत्तु प्राग्व्यापितया मलयवत्यनुरागोपवर्णनं· यच्चोक्तं सामान्यगुणयोगी धि
रोदात्त इति तदपि पराधिकालङ्घ्यादि वास्तवबलान्मदे कः अपि च वस्तु स्थि
ता बुद्धयुधिष्ठिरजीमूतवाहनादिव्यवहाराः शान्ततामाविर्भावयति· ॥ ॥

अत्रोच्यते। यत्तावदुक्तं सर्वोत्कर्षेण हि निरोदात्तमिति तन्न जीमूतवाहनादेरपि हीयते। न ह्येकरूपैव विजिगीषुता। येन केनापि शौर्यत्यागदयादिनान्यानतिशेते स विजिगीषुर्न तु यः परापकारे
णार्थग्रहणादिषु प्रवृत्तः सोऽपि। तथात्वे च मार्गदूषकादेरपि धीरोदात्तत्वप्रसंगः। रामादेरपि जगत्पालनीयमिति दुष्टनिग्रहे प्रवृत्तस्य नान्तरीयकत्वेन भूम्यादिलाभो। जीमूतवाहना
21 दिस्तु प्राणैरपि परार्थसंपादनाद्विश्वमतिशेते इत्युदात्ततमः। यच्चोक्तं निष्कामतासादिना विषयसुखपराङ्मुखत्वेन तन्न। स्वसुखकार्पण्यहेतु तुच्छसुखतृष्णा तु निरभिलाष एव। यथा
भिज्ञानशाकुन्तले। स्वसुखनिरभिलाषः खिद्यसे लोकहेतोः प्रतिदिनमथवा ते वृत्तिरेवंविधैव। अनुभवति हि मूर्ध्ना पादपस्तीव्रमुष्णं शमयति परितापं छायया संश्रितानामिति। म
लयवत्यनुरागोपवर्णनं तु शान्तनायकस्याश्रयं शान्तनायकत्वं प्रत्युत निषेधति। शान्तत्वं चानहंकृतत्वं तच्च विप्रादेरेवेति वस्तुस्थित्या विप्रादेः शान्तता न स्वपरिभाषामात्रेण। बुद्ध
जीमूतवाहनयोस्तु कारुणिकत्वाविशेषेऽपि सकामनिष्कामकरुणत्वधर्मतो भेदः। अतो जीमूतवाहनादेर्धीरोदात्तत्वमिति॥ अथ धीरोद्धतः। दर्पेति। दर्पः शौर्यादिजन्य उत्सेकः। मात्सर्यमसहनता। मंत्रब

दर्पमात्सर्यभूयिष्ठो मायाछद्मपरायणः। धीरोद्धतस्त्वहंकारी चलश्चण्डो विकत्थनः॥५॥

लेनाविद्यमानवस्तुप्रकाशनं माया। छद्म वंचनमात्रं। चलोऽनवस्थितः। चण्डो रौद्रः। स्वगुणशंसी विकत्थनः। धीरोद्धतो भवति। यथा रावणः। त्रैलोक्यैश्वर्यलक्ष्मीहठहरणसहा बाहवो रावणस्येति। यथा वा
जामदग्न्यः। कैलासोद्धारसारत्रिभुवनविजयेत्यादि। धीरललितादिशब्दाश्च यथोक्तगुणसमारोपितावस्थाभिधायिनो वत्सराजादिवन्न तु जातिवत्कश्चिदवस्थितरूपा इति। तथात्वे च महा
कविप्रबन्धेषु विरुद्धानेकरूपाभिधानमसंगतमेव स्यात् जातेरनपायित्वात्। तथा च भवभूतिनैक एव जामदग्न्यो ब्राह्मणातिक्रमत्यागो भवतामव भूतये। जामदग्न्यस्तथा मित्रमन्यथा दुर्मनाय
न इत्यादिना रावणं प्रति धीरोदात्तत्वेन कैलासोद्धारसारेत्यादिभिश्च रामादीन् प्रति प्रथमं धीरोद्धतत्वेन पुनः पुण्या ब्राह्मणजातिरित्यादिभिर्धीरशान्तत्वेनोपवर्णितः। न चावस्थान्तराभिधानम
नुचितं। अङ्गभूतनायकानां नायकान्तरापेक्षया महासत्त्वादेरनवस्थितत्वादङ्गिनस्तु रामादेरेकप्रबन्धोपात्तान् प्रत्येकरूपत्वादारम्भावस्थायास्तावस्थातोऽवस्थान्तरोपादानमन्याय्यं। यथोदात्तत्वे
नाभिमतरामस्य छद्मना वालिवधान्महासत्त्वताया आद्यावस्थायाः परित्याग इति वक्ष्यमाणेन च दक्षिणाद्यवस्थानां पूर्वां प्रत्यन्यया हृतत्वं सन्नायकत्वेनाविर्भावादुदात्तावस्थानवस्थानं रामा

रघरूपक